MSS No. 372 Subject

Name of MSS अनूप विलास

Author

Period Folios 82

Script Devnagiri Source Pirthi Pal Singh

Missing Folios

1A

ञो तीह न संशय इति भविष्योत्तरे : तस्माद्दोषवसंतादौ बलिराज्ये तथैव च पूर्वविद्धैव कर्तव्या प्रति
पत्सर्वदा बुधैरिति वृद्धवसिष्ठवचनात् चैत्रकृष्णप्रतिपत् पूर्वविद्धा भूतिवंदनादौ ग्राह्या
अथ श्वपचं स्पृष्ट्वा स्नात्वा होलिकाविभूतिं लापयेत् तदुक्तं भविष्ये भगवल्लिंगोक्ते वीके : क्रो
षु तं च विष्टां च वस्त् चैत्रमासि महाबाहो प्रवृत्ते प्रतिपद्दिने यत्नतः श्वपचं स्पृष्ट्वा स्नात्वा सवासा जलमा
विशेत् न तस्य दुरितं किंचिन्नाधयो व्याधयो न च तथा प्राज्ञ तेन मधुमासे च प्रतिपद्युदिते रवौ कृ
त्वा चावश्यककार्याणि संतर्प्य पितृदेवताः वंदयेद्धोलिकाभूतिं सर्वदुष्टोपशांतये गोमहिष्यादि
प किंचित्तत्र संभूतपेन्नृपः तैलवस्त्रादिभिः सर्वैर्वादित्राद्यैस्ततोनयेत् तत्र भूतिवंदनमंत्रः
वंदितासि सुरेंद्रेण ब्रह्मणा शंकरेण च अतस्त्वं पाहि नो देवि भूते भूतिप्रदा भवेति ततः सचंदन
माम्रमुकुलं चाश्नीयात् तदुक्तं पुराणसमुच्चये वृत्ते तु षार समये स्थिते पंचदश्यां प्रातर्वसंतसमये
समुपस्थिते च संप्राश्य चूतकुसुमं सह चंदनेन सत्यं हि पार्थ पुरुषोऽथ समाः सुखी स्यादिति तन्मं
त्रः चूतमग्र्यं वसंतस्य माकंदकुसुमं नवं सचंदनं पिबाम्यद्य सर्वकामार्थसिद्धये इति चैत्रकृष्ण
द्वितीयायां कामोत्सवं कुर्यात् तत्प्रकारो भविष्ये तथा प्रातर्द्वितीयायां पुत्रमित्रादिसंयुतः नृपति
र्विनिते ते देशे वितानवरशोभिते उपविश्यासने रम्ये पौरजानपदैः सह सिंदूरकुंकुमदेहादपट्टवासैः स

वंदनैः त्रिकीर्त्यैर्लोकानंतांवृत्तैः सामान्यं च चम्पकं पद्मकं गीतनृत्यविनोदैश्च कुर्यात्कामं महोत्सवं
एवं कुर्वन्नवाप्नोति परं वत्सरं सुखमिति इयं द्वितीया पूर्वविद्धा ग्राह्या प्रातर्द्वितीयायामित्युक्तेः हो
लिकानंतरं कार्यत्वाच्च चैत्रकृष्णमाघस्यामस्मिन्मीनिवृत्तौ यावती तैलाभ्यंगात्वसंद एव चैत्रकृष्णमत्र यो
दश्यां योगविशेषः स्कांदे वारुणेन समायुक्ता मधौ कृष्णत्रयोदशी गंगायां यदि लभ्येत कोटिसूर्य
ग्रहैः समा शुभयोगसमायुक्ता शनौ शतभिषा यदि महामहेति विख्याता त्रिकोटिकुलमुद्धरेत् पु
लस्त्यः चैत्रकृष्णचतुर्दश्यां यः स्नात्वा [illegible] शिवसन्निधौ न प्रेतत्वमवाप्नोति गंगायां तु विशेषतः अथ चै
त्रशुक्लप्रतिपदुदयव्यापिन्यां वत्सरारंभः चैत्रे मासि जगद्ब्रह्मा ससर्ज प्रथमेहनि शुक्लपक्षे सम
ग्रं तु तदा सूर्योदये सति इति ब्रह्मोक्तेः दिनद्वये तद्व्याप्तित्वे तदभावे च पूर्वैव वत्सरादौ वसंतादाविति
वृद्धवशिष्ठोक्तेः अथ मलमासे त्वेत्रैव वत्सरारंभः नष्टचंद्रप्रतिपदि ग्रस्ताए व वत्सरादि प्रतिपत्त्वात्
अत्र तैलाभ्यंगो नित्यः वत्सरादौ वसंतादौ बलिराज्ये तथैव च तैलाभ्यंगमकुर्वाणो नरकं प्रतिपद्य
त इति वृद्धवशिष्ठोक्तेः अस्यामेव नवरात्रारंभः तत्र मार्कंडेयपुराणे शरत्काले महापूजा क्रियते या
च वार्षिकी इति रूपं देवीव्रते परभुताग्राह्या [illegible] श्रमाभुतानकर्त्तव्या प्रतिपच्चं [illegible] कार्या नेमुहूर्तमात्राकर्त्त
व्या द्वितीयादियुतान्विते ति देवीपुराणात् वैधृत्यादिनिषेधस्तु शारदनवरात्रविषयमेतौ [illegible] वृद्धवोः
र्यप्रतिपत्प्रोतकल्पादिः इति त्रिस्थलीसेतौ [illegible] पदः पद [illegible] भक्तिपय [illegible]

5

एषतमामताः तासु श्राद्धं कृतेउपमवास्य इतिनागरखंडात चैत्रशुक्लद्वितीयायां भविष्योत्तरे चै
त्रशुक्लद्वितीयायामुमापुत्रफलार्थिभिः शिवपूजा चाग्निपूजा कर्त्तव्या मुनिसत्तमेति मुहूर्त्तमात्रस
त्वेपिदिने गौरीव्रतं परेहनीति माधवोक्तेः चैत्रशुक्लतृतीयायां चतुर्थीयुक्तायां गौरीमहेश्वरं चैस
पूज्य दोलोत्सवं कुर्यात् तदुक्तं देवीपुराणे तृतीयायां यजेद्देवीं शंकरेण समन्वितां॥ शं दोलयेत्तै
वत्सरिशैमातुष्टयेसदा रात्रौ जागरणं कार्यं प्रातर्देयाच्च दक्षिणा सौवर्णं त्रिभवेद्गौरी सुजतः प्रा
करोमतः चतुर्भुजश्च देवोसौ द्विभुजा पार्वती भवेत् ॥ अत्रैव सौभाग्यशयनव्रतमुक्तं मात्स्ये वसंतमा
समासाद्य तृतीयायां जनप्रिये सौभाग्याय ततः स्त्रीभिः कार्यं व्रतमनुत्तमं इति इयं मन्वादिरस्मिसा
श्राद्धे परा ह्वव्यापिनी ग्राह्या न पाना दावुत्तरा इति कालादर्शः ॥ अधिकमासे पीदकर्त्तव्यं इत्तः म
न्वादिकं तेषु किं च कुर्यान्मासद्वयेपि चेति स्मृतिचंद्रिकोक्तेः विषुवायनसंक्रांतिमन्वादियुगा
दिषु विहाय पिंडनिर्वापं सर्वं श्राद्धं समाचरेदिति कालादर्शे अत्र पिंडदानं नास्ति तत्प्रसंगेन सर्व
मन्वादयो मत्स्यपुराणे कालिरख्यते अश्वयुक्शुक्ले नवमी द्वादशी कार्त्तिके सिते तृतीया चैत्र
मासस्य तथा भाद्रपदस्य च श्रावणे चाष्टमी कृष्णा पौषे चैकादशी सिता वैशाखमासे दशमी माघ
मासस्य सप्तमी श्रावणे चा अमावास्या ज्येष्ठे पंचदशी सिता आषाढी कार्त्तिकी माघी चैत्री चैव विशेष

अ॰वि॰
२

तः एतामन्वादयः प्रोक्ता दत्तस्याक्षयकारकाः स्मार्त्तं एतद्विहाय सर्वामन्वादयः शुक्ला एव ग्राह्याः एताः
शुक्लपक्षस्थाः पौर्वाह्णिकाः कृष्णेत्वापराह्णिकाः पूर्वाह्णेतु सदाग्राह्याः शुक्लामनुयुगादयः दैवकर्म
णि पित्र्ये च कृष्णे चैवापराह्णिकाः इति गारुडात् अथ मन्वादि पित्र्ये युगादि कर्मणि तिथयः पूर्वा
ह्णिकाः स्युः सिते विज्ञेयाः अपराह्णिकाश्च बहुले इति दीपिकोक्तेः अथ गृह्याम एव तत्तीयायां मत्स्यावृत्ता
रः एतत्प्रसंगेन सर्वाण्यवतारतिथयो लिख्यन्ते पुराणसमुच्चये मत्स्योभूद्धुतभुग्दिने ३ मधुसिते
कूर्मो विधौ १ माधवे वाराहो गिरिजात्मजतिथौ ९ नभसिपञ्चते १४ सिते माधवे सिंहो भाद्रपदे सिते हरिति
थौ १२ श्रीवामनो माधवे रामो गोविन्दतिथ्यां ३ वतः परमभूद्रामो नवम्यां मधौ ९ कृष्णोष्टम्यां नभसि
सिते परे चाश्विने यद् दशम्यां १० बुद्धः कल्की नभसि समभूच्छुक्लपक्षे क्रमेण ६ अथोह मध्ये वा
मनो रामरामो मत्स्यः क्रोडश्चापराह्णे विभागे कूर्मः सिंहो बौद्धकल्की च सायं कृष्णो रात्रौ काललग्ना
स्ये च पूर्वे क्रोडः वाराहः कालसाम्येऽर्धरात्रौ यत्समये यस्यावतारस्तत्तत्समयव्यापिनी ग्राह्या
स्या अत्र कुत्रचिदन्या अवतारतिथयः उक्ताः कल्पभेदाद्वेयाः चैत्रशुक्लपंचमी कल्पादिः त
मात्स्ये २ त्प्रसंगात्सर्वा लिख्यन्ते वैशाखस्य तृतीया या कृष्णा या फाल्गुनेऽमावास्या पंचमी चैत्रमासस्य तथैव वा
स्या तथापरा शुक्ला त्रयोदशी माघे कार्तिकस्य तु सप्तमी नवमी मार्गशीर्षे सप्तैताः संस्मराम्य
हं अत्रापि शुक्लाः पौर्वाह्णिकाः कृष्णोपराह्णिका ग्राह्याः कल्पादिलक्षणं ब्रह्मसंपुराणे ब्रह्मलेखापा

३

3A

दिनस्यादिः कल्पादिः साप्रकीर्त्तिता इति मन्वादौ युगादौ कल्पादौ च श्राद्धं दानं चाल्पकारकं भवति
तदुक्तं मात्स्ये कृतं श्राद्धं विधानेन मन्वादिषु युगादिषु हायनानि द्विसाहस्रं पितॄणां तृप्तिदं भवेत् तथा
कल्पानामादयो येताः दत्तस्याल्पकारकाः इति अस्यां पंचम्यां लक्ष्मीपूजा पिकतीत्या तदुक्तं ब्राह्मे
पुराणे वसन्तपंचम्यां चैत्रमासि शुभानना श्रीर्विष्णुसलोकान्मानुष्यं संप्राप्ता केशवाज्ञया तस्मात्तां पूज
येत्तत्र यस्तं लक्ष्मीर्न मुंचति चैत्रशुक्लाष्टमी अशोकाष्टमी अस्यां नवमीयुक्तायामशोकवृक्षच्छाया
यां गत्वा स्नानं कीपूजयित्वा अष्टौ अशोककलिकाः पिबेत् तत्र मन्त्रः त्वामशोक नराभीष्ट
मधुमाससमुद्भव पिबामि शोकसंतप्तो मामशोकं सदा कुरु इति ततोऽशोकमालिंगयेत् तत्र कालि
दिधापद्मपुराणेभोजयित्वा गृहमागच्छेत् अस्यामेवाष्टम्यां भवान्याउत्पत्तिः अतो दर्शनमावश्य
कं तथा च कालिकाखंडे भवानी प्रत्यक्षरूपेण शुक्लाष्टम्यां मधौ नरः न जातु शोकं लभते सदानंदम
यो भवेदिति कालिकापुराणे चैत्रमासि सिताष्टम्यां यो नरो नियतेन्द्रियः स्नात्वा ब्रह्मसुतातोये स पा
त्विफलं पदं विष्णुः पुनर्वसुबुधोपेता चैत्रमासि सिताष्टमी प्रातस्तु विधिना स्नात्वा वाजपेयफ
लं लभेत् स्नाने मन्त्रः ब्रह्मपुत्र महाभाग शान्तनोः कुलनन्दन अमोघगर्भसंभूत पापं लौहित्य मे हर
इति चैत्रशुक्लनवमी रामनवमी इयं मध्याह्नव्यापिनी ग्राह्या चैत्रशुक्ले तु नवमी पुनर्वसुयुता यदि से

प्र॰वि॰ ४ वमरमाकूयोगेन महाँतिमाभवेत् इत्यगस्त्यसंहितोक्तेः दिनद्वये तद्व्याप्तौ परे कर्त्तव्या तां पूजयेत् अथ व्र
तविधिः प्रातः कृतनित्यक्रियः सूर्यः सोमो यमः कालः संध्ये भूतान्यहः क्षपाः पवनो दिक्पतिर्भूमि
राकाशं खचरामराः ब्राह्मं शासनमास्थाय कल्पध्वमिह संनिधिमिति मंत्रेण सूर्यादिदेवताभ्यो
व्रतं निवेद्य प्राङ्मुखः प्राणानायम्य संकल्पं कुर्यात् तत्र संकल्पमंत्रः उपोष्येन वमीं त्वद्य यामेष्वष्टसु रा
घव तेन प्रीतो भव त्वं भो संसारात्त्राहि मां हरे इति ततः कोमलांगं विशालाक्षं इंद्रनीलसमप्रभं दक्षि
णांगे दशरथं पुत्रावेक्षणतत्परं पृष्ठतो लक्ष्मणं देवं सच्छत्रं कनकप्रभं पार्श्वे भरतशत्रुघ्नौ ता
लवृंतकरावुभौ अग्रे व्यग्रं हनूमंतं रामानुग्रहकांक्षिणं इति ध्यायेत् ततो रामप्रतिमासमीपे षट्को
च णमध्ये कोशल्यानंदकारं रामं प्रजपेत् षट्कोणे पंचकोणेषु रां हृदयाय नमः रीं शिरसे स्वाहा रूं शि
खायै वषट् रैं कवचाय हुं रौं नेत्रत्रयाय वौषट् रः अस्त्राय फट् इति षडंगानि षट्कोणे पूजयेत् त
तः कोणगतोऽष्टदलकमलदलमूलेषु हनूमंतं १ सुग्रीवं २ भरतं ३ विभीषणं ४ लक्ष्मणं ५
अंगदं ६ शत्रुघ्नं ७ जांबवंतं ८ पूजयेत् ततो दलमध्येषु धृतिं १ जयंतं २ विजयं ३ सुराष्ट्रं ४ राष्ट्रव
र्द्धनं ५ अकोपं ६ धर्मपालं ७ सुमंतं ८ पूजयेत् दलाग्रेषु पूर्वादिक्रमेण इंद्रादीन् लोकपालान् पूज
तदग्रे वज्रं १ शक्तिं २ दंडं ३ खड्गं ४ पाशं ५ अंकुशं ६ गदां ७ शूलं ८ चेति तेषामायुधानि पूजयेत् रा

4A

मपूजायामागमोक्तमूलमंत्रः इदंविष्णुरितिवैदिकमंत्रोवा ओंरामायनमः इतिनाममंत्रोवाद्वे पः १
इन्द्रोग्निश्चयमश्चैवनैरृतोवरुणोनिलः कुबेर ईशोब्रह्मानंतदिक्पालाः स्थापयंतुते इतिस्था
नमंत्रः रामस्यजननीचासिरामात्मकमिदंजगत अतस्त्वांपूजयिष्यामिलोकमातर्नमोस्तुते
इतिकौशल्यापूजायां ओं नमोदशरथायेतिदशरथपूजायां अन्येषां नाममंत्रैः पूजाकार्या
ततः पुष्पांजलिंदानात्सर्वे फलपुष्पं वा अशोकपत्ररत्नं तुलसीदलयुक्तं शंखं गृहीत्वार्घ्यं
दद्यात तत्रमंत्रः दशाननवधार्थाय धर्मसंस्थापनाय च राक्षसानांवधार्थाय दैत्यानां निध
नाय च परित्राणाय साधूनां जातोरामः स्वयंहरिः गृहाणार्घ्यं मया दत्तं भ्रातृभिः सहितोमम
ति ततः पुष्पांजलिंदद्यात एवंव्रतंपूजनंचकृत्वा रात्रौ जागरणं कृत्वाप्रातस्स्नात्वा विप्रायदद्यात त
त्रदानमंत्रः इमांस्वर्णमयींरामप्रतिमांचप्रयत्नतः श्रीरामप्रीतये दास्ये रामभक्ताय धीमते प्रीतो
रामोहरत्वाशुपापानिसुबहूनिमे अनेकजन्मसंसिद्धान्यभ्यस्तानिमहांतिचेति चैत्रशुक्लदशम्यां ति २
नवमीयुतायांपमपूजाकार्या चैत्रशुक्लैकादश्यां विष्णोर्दोलोत्सवः कार्यः चैत्रमासस्यशुक्लाया
मेकादश्यांतुवैष्णवैः आंदोलनीयोदेवेशः सलक्ष्मीकोमहोत्सवैरितिब्रह्मोक्तेः चैत्रशुक्लदमनोत्सवः

त्र·वि· त्रिवृभक्तादिदिविस्तु चतुर्दश्यादौ कार्यः तत्र स्मात्सीयत्तिस्पिषुवृद्धस्यादेर्दमनार्पणमितिरामचंद्रचंद्रि
५ कोक्तेः तथा च पुरस्मै देवाय दमनमारोप्यते तन्नाम्नाचतुर्थ्यां नमोंते नतस्मैतद्देवस्येति ॥ यो दमनारोपः
5 कर्त्तव्य इति तेषं देवादस्मिन्मासे चेन्नकृतस्तदा वैशाखश्रावणे वा तत्तिथौ कार्यः इदं दमनारोपणं तरे
मलमासेन कार्यं उपाकर्म्मोत्सर्ज्जनं च पवित्रं दमनार्पणं इस्योनस्य बलिं विष्णोः शयनं परिवर्त्तनं
कुर्यान्न कुस्मग्रहो मेसे पौत्तवि निष्प्रय इति वृद्धगार्ग्यवचनात् चैत्रशुक्लत्रयोदश्यां पूर्वविद्धायाम
नंगव्रतं त्रयोदशी तिथिः पूर्वा सिते इति दीपिकोक्तेः चैत्रशुक्लत्रयोदश्यां मदनं चंदनालके कृत्वा
संपूज्य विधिवद्वीजयेद्व्यजनेन तु ततः सन्तुष्टितः कामः पुत्रपौत्रसमृद्धिदः इति वचनाच्च चैत्रशुक्लाव
तुर्दश्यां रात्रिव्यापिन्यां रात्रौ भूतानां शांत्यै च पूजा कार्या चैत्रशुक्लपौर्णमास्यां परभूतायामस्यां अत्र वि
शेषो विद्व्यस्मृतौ चैत्री चित्रायुतां चेत्स्यात्तस्यां चित्रवस्त्रदानेन सौभाग्यमाप्नोति तथा प्रातल्पिमंदेवा के
गुरौ वापि वारेष्वेतेषु चैत्रिका तत्राश्वमेधजं फलं स्नानमात्राज्जाह्नवीभिः भेद्दिति इयं मन्वादिरपि इ
ति श्रीमिश्रगागाभट्टात्मजदीक्षितमणिरामकृते श्रीमदनरूपविलासे धर्म्माब्धौ वत्सरदले चैत्रमा
सः ॥ अथ वैशाखमासः चैत्रशुक्लैकादश्यां पौर्णिमास्यां वा मेषसंक्रांतौ वा प्रारभ्य नुद्धुपायामधुसूदनम
भ्यर्च्य संकल्पपूर्वकं वैशाखस्नाननियमं कुर्यात् तदुक्तं पद्मे मधुमासस्य शुक्लायामेकादश्यामुपो
षितः पंचदश्यां च मोदीद मेषसंक्रमणे तु वा वैशाखस्नाननियमं प्रारंभेण नामनुत्तया मधुसूदनम

5A मर्च्चं कुर्यात्संकल्पपूर्वकमिति तत्रमंत्रः वैशाखंसकलंमासंमेषसंक्रमणेरवेः प्रातःसनियमःस्ना
स्येप्रीयतांमधुसूदनः मधुहंतुःप्रसादेनब्राह्मणानामनुग्रहात् निर्विघ्नमस्तुमेपुण्यंवैशाखस्नानम
न्वहं माधवेमेषगेभानौमुरारेमधुसूदन प्रातःस्नानेनमेनाथफलदोभवपापहन्निति यस्मिंस्ती
र्थेनद्यादौवास्नानंक्रियतेतत्तीर्थनामसंकल्पेग्राह्यं तीर्थस्नानेविशेषस्तीर्थवदेत् अत्रविशे
षः पाद्मे प्रातःस्नात्वाविधानेनमाधवेमाधवप्रियं योश्वत्थमूलमासिंचेत्तोयेनबहुनासदा कु
र्कोस्त्रप्रदक्षिणंततःसर्वदेवमयःपतः पितृदेवमनुष्याश्चतर्प्पयेत्सचराचरं केवृपपष्टेतोगात्तु
स्नात्वापिप्पलतर्पणं कृत्वागोविंदमभ्यर्च्यनदुर्गतिमवाप्नुयादिति संपूर्णमासंस्नानाशक्तौत्र्य
हंवास्नायात् तदुक्तंपाद्मे त्रयोदश्यांवाचतुर्दश्यांवैशाख्यांवादिनत्रयं अपिसम्यग्विधानेननारी
वापुरुषोपिवा प्रातःस्नानंसनियमःसर्वपापैःप्रमुच्यते नियमोत्रसहविष्यभोजनभूमिशाय वर्षि ५
नादिरूपः अत्रदानविशेषोवामनपुराणेगंधाश्मनास्मानितथावैशाखेसरम्भोणिच देयानि
द्विजमुख्येभ्योमधुसूदनतुष्टये एवंस्नात्वाउद्यापनंकुर्यात् तदपिवामनपुराणे मासमेकंबहिःस्ना
त्वानद्यादौविमलेजले एकादश्यांद्वादश्यांवापौर्णमास्यामथापिवाउपोष्यनियतोभूत्वाकुर्यादु
द्यापनंबुधः मंडपंकारयेदादौकलशांतत्रविन्यसेत् निष्कैणवाथतदर्द्धेनतदर्द्धार्द्धेनवापुनःशक्त्या

प्र॰वि॰ ६ वाक्कारयेद्देवं सौवर्णं लक्षणान्वितं लक्ष्मीयुतं जगन्नाथं पूजयेदासनेबुधः भूषणैश्चंदनैःपुष्पैर्दी
पैर्नैवेद्यसंचयैः एवंसंपूज्य विधिवद्विप्रोजागरणंचरेत् प्रभाते कृतकृत्यःस्यात्गत्वा हवेषां ग्रहान्मसे
तहोमंकुर्यात्प्रयत्नेनपापसेनविवर्जनं तिलाज्येनपवेदींयसर्वैर्वापिस्वशक्तितः अष्टोत्तरसह
स्त्रंवाष्टोत्तमष्टोत्तरंतुवा प्रतिद्विसहस्रेणैवद्वादशिसहस्रेणतुवा व्रतंसंपूर्णसिद्ध्यर्थंचेन्नमेकांपय
१५ स्विनींपांडुकांनेहोषत्रयंगरवेक्षजनंतथा श्रोष्यासोपस्करांपीठंदीपिकांदर्पणंतथा ब्राह्मणा
न्भोजयेत्रिंशत्तेभ्योदद्याच्चदक्षिणां कलमाम्यपसाप्रणन्नतेभ्योदद्यात्पुंवास्त्रपा एतत्कुर्वीण
नोतेवोक्तं वैशाखाविधिनालोलाभोजपेद्ब्राह्मणानन्दसा कुमारंसर्वपापेभ्यो मुच्यतेनात्रसं
शयः इति वैशाखकृष्णप्रतिपत नारसिंहकल्पादिः वैशाखकृष्णनवम्यामुपोष्यचंडिकांपूजयेत
तदुक्तंभविष्ये वैशाखमासेराजेन्द्रनवम्यांपक्षयोर्द्वयोः उपवासपरोभक्त्यायजमानस्तुचंडि
कां विमानवरमारूढो देवलोकेमहीयते वैशाखकृष्णत्रयोदशी गौरीकल्पादिः वैशाखशु
क्लद्वितीया नीललोहितकल्पादिः वैशाखशुक्लतृतीया अक्षयतृतीया सापूर्वाह्णव्यापि
नीग्राह्या दिनद्वयेतद्व्याप्तौपरैव युग्मादिदर्शात् द्वयमपि पूर्वाह्णव्यापित्वेपूर्वैव तदुक्तंनारदीये
वैशाखशुक्लपक्षेतुतृतीयारोहिणीयुता दुर्लभाबुधवारेण सोमेनापियुतातथा रोहिणीबुधयु

6A

ला पि पर्व विङ्काविवर्जिता भक्त्याकृतामां धातः पुण्यं हंति पुराकृतमिति ॥ अत्र दानविशेषो भविष्योत्त
रे कुंभान्नसक्तुकान्सांभाष्कर्वरसैः ॥ सह यववेगोधूमचणकाः सक्तुदध्योदनं तथा ग्रैष्मिकं सर्वमे
वात्र ससंदाने प्रशस्यते मंत्रस्तु ॥ एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः ॥ अस्य प्रदानात्तृप्यंतु पितरोऽपि पि
तामहाः ॥ गंधोदकतिलैर्मिश्रं सान्नं कुंभं फलान्वितं पितृभ्यः संप्रदास्यामि अक्षय्यमुपतिष्ठतु ॥ प्रसंगात्त
दौ युगादयो यथा विष्णुपुराणे वैशाखमासस्य तु या तृतीया नवम्यसौ कार्त्तिकशुक्लपक्षे नभस्यमास
स्य च कृष्णपक्षे त्रयोदशी पंचदशी च माघे ॥ पंचदशी अमावास्या तथा च नारदीयपुराणे शुक्ले द्वे च कृ
ष्णे च युगादिकवयो विदुः ॥ शुक्ले वैशाखतृतीया कार्त्तिकनवमी तिथिः ॥ कृष्णे भाद्रपदत्रयोदशी माघामा
वास्या च ॥ ब्रह्मपुराणानुसारेण माघे पंचदशी पौर्णमासी वैशाखशुक्लपक्षस्य तृतीयायां कृतयुगं कार्त्ति
के शुक्लपक्षस्य त्रेता च नवमेऽहनि ॥ अथ भाद्रपदे कृष्णे त्रयोदश्यां तु द्वापरं माघे तु पौर्णिमास्यां तु घोरं कलि
युगं तथा ॥ युगादिगास्तु तिथयो युगाद्यास्तेन विश्रुताः ॥ सूर्यस्य सिंहसंक्रांत्यां सार्धं तत्कृतयुगस्य तु ॥ अथ वृश्चि
कसंक्रांत्यामंतं त्रेतायुगस्य तु ॥ ततो वृषसंक्रांत्यामंतं द्वापरस्य च तथा च कुंभसंक्रांत्यामंतं कलियु
गस्य तु ॥ युगादिषु युगांतेषु श्राद्धं कुन्नच्येतं तस्मा त्कल्पभेदेन माघपंचदश्यां व्यवस्थेति केचित् देशाचारा
नुसारेण व्यवस्थेत्यन्ये चक्रुः ॥ यथा अस्यां गंगास्नानं समुद्रस्नानं चातीव पुण्यप्रदं वैशाखशुक्ले तृतीयायाम
मत्र तु पूर्वा परा च सा मध्याह्नव्यापिनी ग्राह्या दिनद्वये तद्व्याप्तावेकदेशतः समव्याप्तौ परा अन्यथा पू
र्वा

नृ॰ति॰ वैव वैशाखशुक्ले सप्तम्यां जन्हुऋषिकर्णेन गंगा पपौ इतिः ब्राह्मे वैशाखशुक्ले सप्तम्यां जन्हुना जान्हवी पुरा क्रो
१ धात्पीता पुनस्त्यक्ता कर्णरंध्रात्तु दक्षिणात् तां तत्र पूजयेद्देवीं गंगां गगनमेखलामिति अत्र मध्याह्नव्या
पिनी ग्राह्या इयमेव दिनवसप्तमी वैशाखशुक्ले द्वादश्यां योगविशेषो हेमाद्रौ ज्योतिःशास्त्रे पंचा
ननैगुरुभमिथुनेत्रामेषरविः स्याद्वादिशुक्लपक्षे पापघ्नीनामकरभेण युक्तातिथिर्व्यतीपात इतीह योगः अ
स्मिंस्तु यो भूमिहिरण्यदानेन सर्वं परिहाय पापं स्वरूपविंदुत्वमनामयत्वमस्यापि परमेलभते मनुष्यः प
द्मानन्दः सिंहः पापघ्नीनामतिथिर्द्वादशी करभं हस्तः तथा च वैशाखस्य शुक्ले द्वादश्यां हस्तयुतायां सिंह
स्था [illegible] गुरुभौमौ मेषस्थः सूर्यश्चेत्तदा व्यतीपातसंज्ञको योग इत्यर्थः [illegible] वैशा
खस्य शुक्ले चतुर्दश्यां नृसिंहजयंती सा प्रदोषव्यापिनी ग्राह्या दिनद्वये तद्व्याप्तौ परा विषमव्याप्तौ त्वधिकव्या
पिनी ग्राह्या तदुक्तं नृसिंहपुराणे वैशाखस्य शुक्ले तु चतुर्दश्यां निशामुखे मज्जन्मसंभवं पुण्यं व्रतं पाप
प्रणाशनं वर्षे वर्षे तु कर्तव्यं मम संतुष्टिकारकं अत्र विशेषो नृसिंहपुराणे नृसिंह देवदेवेश तव जन्मदिने
शुभे उपवासं करिष्यामि सर्वभोगविवर्जितमिति संकल्पं कृत्वा आचार्यं कृत्वा सायंकाले हेमीति तत्र मन्त्र
र्तिः स्थाप्या लक्ष्मीस्तत्र चैव च पलेन वा तदर्धेन तदर्धार्धेन वा पुनः यथाशक्त्या तथा कुर्याद्वित्तशाठ्यवि
वर्जितः इत्युक्तं नृसिंहमूर्तिं कृत्वा कलशोपरि स्थाप्य पूजयित्वा रात्रौ जागरणं कृत्वा प्रातः स्नात्वा पुनः
पूज्य नृसिंहाच्युत देवेश लक्ष्मीकांत जगत्पते अनेनार्चाप्रदानेन सफलाः स्युर्मनोरथाः इत्याचार्याय

7A र्थं दत्त्वा महद्भ्योपेन राजा तापे जनिष्यंति चापरे तांस्त्वमुद्धर प्रदेवै वैशाख दुःसहाद्दुर्व्यसनसागरात् पातकार्णवमग्न
सत्त्वान् दुःखांबुवारिभिः तीव्रैः परिभूतस्य महादुःखेविनीतस्य मे करावलंबनं देहि शेषशायिन् जगत्पते श्रीन्र २२
सिंह रमाकांत भक्तानां भयनाशन क्षीरोदार्णवनिवासिन् चक्रपाणे जनार्दन व्रतेनानेन देवेश भुक्तिमुक्तिप्र
दो भव इति प्रार्थयेत् वैशाखे पौर्णमास्यां जाबालिः … अन्नं तोयमुदकुंभं च वैशाख्यां तु विशेषतः द्विजे
प्रपूज्य धर्मराजाय प्रदानात् फलमाप्नुयात् स्वर्णतिलयुतैश्च ब्राह्मणान् सप्त पंच च तर्पयेदुदपात्रै
स्तु ब्रह्महत्यां व्यपोहति कुंभदानमंत्रस्तु स्कांदे … तोया … तव … विष्णुः कृष्णाजिने तिलान्कृत्वा
न्नेहिरण्यं मधुसर्पिषी ददाति यस्तु विप्राय सर्वं तरति दुष्कृतमिति इति मिश्रगंगारामात्मजदीक्षि
त मणिरामकृते श्रीमदनूपविलासे धर्माम्भोधौ वत्सरकृत्ये वैशाखमासः अथ ज्येष्ठमासः वाम
मप न उदकुंभं तु चेत्तु तालवृंतं सचंदनं त्रिविक्रमस्य प्रीत्यर्थं दातव्यं ज्येष्ठमासि च उपानद्युगलं छ
त्रं लवणामलकानि चेति ज्येष्ठकृष्णद्वितीयासमानकस्नानादिः ज्येष्ठकृष्णामावास्यायां सावित्रीव्रतं अत्र च
षष्ठ्यादशघटीमध्य एव चतुर्दशी ततः परं तद्दिने एव वटसावित्रीव्रतं तदर्धे … चतुर्दशीपापरे … तथा
च माधवः पूर्वविद्धैव सावित्रीव्रते पंचदशी तिथिः नाड्याष्टादशमात्र तस्य … हन्तीति तत्र का
रो भविष्ये … ज्येष्ठे वटमूले … सती त्रिरात्रोपोषिता नारी विधिनानेन पूजयेत् अस्य

ग्र॰वि॰
८

स्त्रीतु त्रयोदश्यां नक्तं कुर्याज्जितेंद्रियायाचितं चतुर्दश्याममायां समुपोषणं गृहीत्वा वालुकं पात्रे प्र-
स्थमात्रं युधिष्ठिर ततो वंशमये पात्रे वस्त्रयुग्मेन वेष्टिते सावित्रीप्रतिमां कृत्वा सर्वावयवशोभिनीं सौ-
वर्णीं मृन्मयीं वापि स्वस्वशक्त्या विनिर्मितां सांगुं ससत्यवतां साध्वीं पल्लवैर्वंशदीपकैः वृक्षावलिं
कृत्वा काष्ठभारं युधिष्ठिर विचित्रैः सप्तधान्यैश्च विरूढैः संप्रकल्पितैः रजस्राः कंठसूत्रैश्च कुंभैः कुं-
कुमकेसरैः रजनीरंजितैः सौभाग्यसूत्रमित्यर्थः सावित्र्याः स्थापनं वापि वाचयीत द्विजोत्तमैः रात्रौ
जागरणं कृत्वा नृत्यगीतपुरःसरं ततः प्रभाते विधिना पूर्वोक्तेन नरोत्तमः तामपि ब्राह्मणे दद्यात्व्र-
तं समापयेत् दानमंत्रस्तु सावित्रीयं मया दत्ता साहिरण्या महासती ब्रह्मणः प्रीणनार्थाय ब्रा-
ह्मणः प्रतिगृह्यतां इमां दत्वा द्विजेंद्राय सावित्रीं तां युधिष्ठिर नैवेद्यादि च तत्सर्वं ब्राह्मणस्य गृहे नयेत्
स्वयं दशपदं गच्छेत् स्ववेश्म पुनराव्रजेत् तत्र भक्त्या हविष्यान्नं ब्राह्मणीं ब्राह्मणैः सह विसर्जयेत्ततो वि-
प्रान् सावित्री प्रीयतामिति व्रतेनानेन राजेंद्र वैधव्यं नाप्नुयात्क्वचित् इति ज्येष्ठस्नानकृत्यं ततीपापापूर्ववि-
धायां भास्वद्व्रतं कुर्यात् वहन्नपातपार्श्वे भासावित्रीं वटपैतृकी कृष्णाष्टमी च भरणी ताश्च कर्तव्याः संभवी-
ति स्थितिरिति स्कंदोक्तेः ज्येष्ठमूलं चतुर्थ्यां तु भानुसंज्ञिः अतः सौभाग्यार्थं स्त्रीभिरुमापूजाव्रतादिकं च का-
र्यं ज्येष्ठशुक्लदशमी दशहरा स्कंदे ज्येष्ठमासि सिते पक्षे दशम्यां बुधहस्तयोः गरानंदव्यतीपाते कन्या-

8A

चेद्व वर्षेद वै दशयोगेन नरः स्नात्वा सर्वपापैः प्रमुच्यते ॥ वाराहे ॥ दशमी शुक्लपक्षे तु ज्येष्ठे मासि कुजेऽहनि ॥ अव
तीर्णा यतः स्वर्गाद्धस्तर्क्षे च सरिद्वरा ॥ हरते दश पापानि तस्माद्दशहरा स्मृता ॥ दश पापानि स्तोत्रे ऽप्यद
त्तानामुपादानं हिंसा चैवाविधानतः ॥ परदारोपसेवा च कायिकं त्रिविधं स्मृतं ॥ पारुष्यमनृतं चैव पैशु
न्यं चैवापि सर्वशः ॥ असंबद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधं ॥ परद्रव्येष्वभिध्यानं मनसानिष्टचि
तनं वितथाभिनिवेशश्च मानसं त्रिविधं स्मृतं ॥ एतानि दश पापानीति ॥ अत्र बुधसोमयोः कल्पभेदे
नव्यवस्था ॥ पूर्वं च पत्रे व्यवयोगवाक्यं सैव ग्राह्या ॥ अत्र विधिर्भविष्योत्तरपुराणे ॥ निशायां जागरं
कृत्वा सम्यगुपोष्य च भक्तितः ॥ पुष्पैर्गन्धैश्च नैवेद्यैः फलैश्च दशसंख्यया ॥ तथा दीपैश्च तांबूलैः पूजये
च्छ्रद्धयान्वितः ॥ स्नात्वा भक्त्या च जाह्नव्यां दशकृत्वो विधानतः ॥ दशप्रसृतिकृष्णांश्च तिलान्सर्पिश्च वै ज
ले ॥ सक्तुपिण्डान्गुडपिण्डान्दद्याद्दशसंख्यया ॥ ततो गंगातटे रम्ये हेम्ना रूप्येण वा तथा ॥ गंगायाः प्रति
मां कृत्वा वक्ष्यमाणस्वरूपिणीं ॥ संस्थाप्य पूजयेद्देवीं तदभावे मृदापि वा ॥ अथ तत्राप्यशक्तश्चेल्लिखित्वै रवेप
पे नवे भुवि ॥ वक्ष्यमाणेन मंत्रेण कुर्यात्पूजां विशेषतः ॥ नारायणं महेशं च ब्रह्माणं भास्करं तथा ॥ भगीर
थं च नृपतिं हिमवंतं नगेश्वरं ॥ गंधपुष्पादिभिः सम्यग्यथाशक्तिः प्रपूजयेत् ॥ दशप्रस्थान्तिलान्दद्या
द्दशविप्रेभ्य एव च ॥ दशप्रस्थान्यवान्दद्याद्दशसंख्यागवीस्तथा ॥ प्रस्थः षोडशपलानि पलमष्टमात्रं महा
लीवा तु ॥ तेषं मत्स्यमण्डूककमकरदकच्छपादिजलेचरान् कारयित्वा यथाशक्तिः स्वर्णेन रजतेन वा तद

भावेपिष्टमयानभ्यर्च्य कुसुमादिभिः गंगायां प्रदीपेदाज्य दीपांश्चैव प्रवाहयेत् पूजामंत्रः ॐ नमः
शिवायै नारायण्यै दशहरायै गंगायै नमो नम इति भविष्ये तस्यां दशम्यामेतच्च स्तोत्रं गंगाज
लेस्थितः यः पठेद् दशकृत्वस्तु दरिद्रो वापि चाक्षमः सोपि तत्फलमाप्नोति गंगां संपूज्य यत्नतः इ
ति गंगास्वरूपं स्तोत्रे चतुर्भुजां त्रिनेत्रां च सर्वावयवशोभितां रत्नकुंभसिताम्भोज वरदाभयसत्करां
श्वेतवस्त्रपरीधानां मुक्तामणिविभूषितामिति अस्यां सेतुबंधे रामेश्वरस्य पूजा कार्या तदुक्तं स्कं
दे सेतुमाहात्म्ये ज्येष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः गरानंदव्यतीपाते कन्याचंद्रे वृषे रवौ द
न१ शयोगेनु मद्भ्योऽसौ लिंगरूपधरं हरं रामो वै स्थापयामास स्वकीयं लिंगमुत्तममिति इति दशहरा
ज्येष्ठशुक्लैकादशी निर्जला तत्र निर्जलामुपोष्य ब्राह्मणेभ्यो जलकुंभान्दत्वा यत्ततो पोक्तकुंभदानमंत्रे
ण दद्यात् व्यजनोपानहौ च दद्यात् तदुक्तं मदनरत्ने स्कांदे ज्येष्ठे मासि सिते पक्षे ह्येकादश्यामु
भा निर्जलामुपोष्यैव जलकुंभान्सशर्करान् प्रदाय विप्रमुख्येभ्यः सोपि पापैर्विवर्जितः विष्णुलो
कमवाप्येह मोदते विष्णुसन्निधाविति ज्येष्ठपौर्णिमास्यामादित्यस्नानं वटसावित्रीव्रतं स्कांदे ज्ये
ष्ठे मासि तु संप्राप्ते पौर्णिमास्यां तथैव च स्नात्वा चैव वटं [illegible] त्वा तं सिंचयेद् [illegible] सूत्रेण वेष्टयेद्बुद्ध्या गं
धपुष्पाक्षतैः धूपैः नमो वैवस्वतायेति भ्रमयेत्तिच्च प्रदक्षिणमिति पूजाप्रकारः अत्र विशेष स्मृत्यादि

9A स्कंदपुराणे ज्येष्ठे मासि तिलान्दद्यात्पौर्णमास्यां विशेषतः ॥ अश्वमेधस्य यत्पुण्यं तत्प्राप्नोति न संशयः
विष्णुरपि ज्येष्ठी ज्येष्ठायुता चेत्स्यात्तस्यां छत्रोपानत्प्रदानेन नरो न राज्यपदमाप्नोतीति इयं रोत्सम
न्वादिः कौर्मकल्पादिश्च सापि वामीहिकी ग्राह्या इति श्रीगंगारामात्मजदीक्षितमणिरामकृते श्रीमद
नूपविलासे धर्मांभोधौ वत्सरकृत्ये ज्येष्ठमासः ॥ अथाषाढः वामने ॥ आषाढे वामनप्रीत्यै प्रदातव्या
नि तु भक्तितः घृतं च तिलं कुंभाश्च घृतधेनुं फलानि चेति ॥ आषाढकृष्णमत्स्यतीया पार्थे गेमयक
ल्पादिः ॥ आषाढामावास्यात्र कल्पादिरिति तिथितत्त्वं ॥ आषाढशुक्लद्वितीयायां स्कांदे ॥ आषाढस्य
पा ७ सितेपक्षे द्वितीया पुष्यसंयुता तस्यां रथे समारोप्य रामं मां भद्रया सह यात्रोत्सवं प्रवर्त्याथ प्रीण
येत् द्विजान्बहून् माजगन्नाथं तथा ... भावे तिथ्यो कार्या सदा सासप्तमीतिथ्यिति तत्रैव आ
षाढशुक्ले चतुर्थ्यां रथं तत् कल्पादिः ॥ आषाढशुक्लषष्ठी कौमारिका भस्या कुमारमर्चयेत इ
यं परविद्धा ग्राह्या वाराहे ॥ आषाढशुक्लषष्ठ्यां तिथिः कौमारिका स्मृता कुमारमर्चयेत्तत्र पूर्वाह्ने
वोषिते दिने इति स्कंद षष्ठीत्यपि नामधेयं ॥ आषाढशुक्लाः सप्तम्यां विवस्वान्नाम भास्करो जातः अ
तस्तत्रोपोष्य पूजयेत् रथयात्राकृतोत्सवे मंडले सर्वकामदमिति ॥ आषाढशुक्लैकादश्यां देवश
यनी ॥ अत्र स्वापेनोत्सवं कुर्यात् ॥ प्रयंस्वापनोत्सवो द्वादश्यामपि कुत्रचिदुक्तः ॥ तथा च देवीभेदेन ब

ग्र॰वि॰ १॰ कस्मान्तेयथासामेवचतुर्मास्यव्रतारंभः व्रतग्रहणप्रकारोभविष्ये महापूजांततःकुर्याद्देवदेवस्य
चक्रिणःजातीकुसुमप्रसूनाभिर्मंत्रेणानेनपूजयेत् सुप्तेत्वयिजगन्नाथजगत्सुप्तंभवेदिदं विबु
10 द्धेत्वयिबुद्धेतप्रसन्नोभवमेच्युत एवंतांप्रतिमांविष्णोः पूजयित्वास्वयंनरः प्रभाषेतागतोविष्णोः कृ
ताञ्जलिपुटस्तथा चतुरोवार्षिकान्मासान्देवस्योत्थापनावधि इमंकरिष्येनियमंनिर्विघ्नंकुरुमे
च्युत इदंव्रतंमयादेवगृहीतंपुरतस्तव निर्विघ्नंसिद्धिमायातुप्रसादात्तवकेशव गृहीतेस्मिन्
व्रतेदेवपंचत्वंयदिमेभवेत् तदाभवतुसंपूर्णंत्वत्प्रसादाज्जनार्दन इतिसंकल्पमंत्रः अथब्रूहतस्य ममि द
स्यानेकविधमाणव्रतनिर्णयःकार्यः चातुर्मास्यव्रतान्यपि तत्रैव मधुरस्वरोभवेद्राजन्मनु
ष्योगुडवर्जनात् तैलस्यवर्जनाद्राजन्सुंदरांगःप्रजायते तैलस्यतिलतैलस्य कटुतैलपरित्या
गाच्छत्रुनाशमवाप्नुयात् योगाभ्यासीभवेद्यस्तुसब्रह्मपदमवाप्नुयात् फलत्यागात्समति
प्र ६ मान्बहुपुत्रोजायते ताम्बूलवर्जनाद्भोगीरक्तकंठःप्रजायते शाकपत्राशीत्यागीग्रपक्वादोऽम न ४
लो[illegible]भवेत् पादाभ्यंगपरित्यागाच्छिरोभ्यंगादिवर्जनात् दीप्तिमान्दीप्तिकरणोयक्षाद्रव्यप
तिर्भवेत् मधुकतैलत्यागेनसौभाग्यमतुलंभवेत् दधिदुग्धतक्रनियमीगोभक्तोगोपतिर्भवेत्
भूमौभुंक्तेयस्तुनरःसपृथिव्याःपतिर्भवेत् सदामनःसदायोगीमधुमांसस्यवर्जनात् निर्व्याधिर्नि
१॰

10A हजोऽजस्त्रीसुरामद्यविवर्जनात् एकांतरोपवासेन ब्रह्मलोके महीयते धारणाभिर्नरो नित्यं गंगास्नाना
न्फलं भवेत् धारणान्त्ययवलोमन्त्रां च गंगास्नानं दिने दिने मौनव्रती भवेद्य स्तुतस्याज्ञाऽस्खलिता भवेत्
ऽऋपमस्त्वेनेन प्राप्नोति पुत्रान्धर्मान्वशेषतः नमो नारायणायेति जपन्न्यस्तफलं लभेत् पादाभिवंदनाद्द्विजमो
द४ ले यैगोदानजं फलं प्रदत्ति णिमाप नेयस्तु कदमैतस्तुतिपाठकः हंसयुक्तविमानेन सचविद्रुमपंदव्र
जेत् एकभक्ताशनो नित्यं समग्निष्टोमफलं लभेत् उपोषणफलं भेदे रं भापालाशपत्रकेः ऽप्रमेषु
पो नरो भुंक्ते कुरुक्षेत्रफलं लभेत् प्रत्येषु प्रतिनिषिद्धपत्रेषु एवमादिव्रते पार्थ तुष्टिमायाति केशवः
जा इति प्रवृत एकभक्तव्रते विप्रमिथुनं पूजयित्वा धेनुदानं व्रतान्ते कार्यं संध्यायां दीपदानं नियमे समाप्ते
सवर्णदीपकं दद्यात् वस्त्रयुतं दद्यात् पत्रभोजने कांस्यपात्रत्यागः तत्र कांस्यपात्रं गोघृतं दद्यात् प
त्रैकेनकृते त्र्यधेनुयुतं वह्वेद्दद्यात् चातुर्मास्यव्रतं कृत्वा व्रतान्ते गोवृषप्रद इति वचनात् तत्र चातुर्मास्ये वा
र्षिकान्मासान्विषयमापेनयः कृतः कृष्यपित्वाद्द्विजेभ्यस्तद्भक्ष्यादद्यात्तद्दक्षिणं दत्वा विसर्जयेद्द्वि
प्रास्ततो भुंजीत वाग्यतः इति श्रावणादिषु चतुर्मासेषु व्रतकार्तिके पुष्पदलं त्यजेत् स्कांदे चत्वार्येता
स्नानिर नियमतुराणां मदाहितं प्रथमे मासि कर्तव्यं निरामिषशाकव्रतं नरैः द्वितीये मासि कर्तव्यं दधिव्रतमतः
नेमं पयोव्रतं ततः तृतीये तु चतुर्थे तु निरामयः द्विदलं बहुबीजं च वृंताकं च विवर्जयेत् निसामेतानि विप्र
प्रेताभ्यां कुरु मनीषिणः जंबीरं राजमाषांश्च मूलकं रक्तमूलकं कूष्मांडं चेक्षुदंडं च चातुर्मास्ये त्यजे

अ॰वि॰ कुष्ठः विशेषात् हृदलीधात्रीकूष्माण्डं इति त्यजेत् वार्षिकान् चतुरो मासान् प्रसुप्ते वै जनार्दने मंचखट्वा
११ दिशायनं वर्जयेत्तु भक्तिमान्नरः अन्नतो वर्जयेद्भार्यां मांसं मधु यवौदनं पटोलं मूलकं चैव वृन्ताकं
च न भक्षयेत् मूलपत्रकरीराग्रफलकांडादिरूढकाः त्वक्पुष्पं कवचं चेति शाकं दशविधं स्मृतं
इति दशविधशाकसंग्रहः नतु व्यंजनमात्रे स्यात् करीरं वंशांकुरं ग्रंथिरूढः अंकुरः कवचं छत्रा
कं सदृशं विष्णुधर्मोत्तरे चतुर्ष्वपीह मासेषु हविष्याशी न पापभाक् स्कांदे एकांतरं त्र्यंतरं वा कु
र्यान्मासोपवासकं अनोदनं फलाहारं नक्तव्रतमथापि वेति तत्राच तेस्मादं भः क्षिपते तस्मै
काद्यपासंकल्पः कर्तव्य इति ज्ञेयं आषाढशुक्लद्वादश्यामनुराधायोगरहितायां पारणं कुर्यात्
तदुक्तं हेमाद्रौ भविष्ये आभाकासितपक्षेषु मैत्रश्रवणरेवती संगमे नहि भोक्तव्यं द्वादश्यां द्वादशी
हरेत् यदि द्वादशी स्वल्पा तदि अनुराधा त्रेधा विभज्य प्रथमांशं विहायानुराधासहितायामपि पार
णं कुर्यात् मैत्राद्यपादे स्वपितीह विष्णुः पौष्णस्य पादे प्रतिबोधमेति श्रुतेस्तु मध्ये परिवर्त्तमेति सुप्तं
प्रबोधपरिवर्त्तमेव प्रवर्ज्यमिति विष्णुधर्मोक्तेः इदं च नद्वयं कस्यचिद्वादो महानिबंधेषु दृष्टत्वादना
कुरमेव लोके तु प्रसिद्धत्वाल्लिखितं आषाढशुक्लपौर्णमासी मन्वादिः सा पूर्वाह्णव्यापिनी ग्राह्या अ
स्यां दानमावश्यकं वैशाखी कार्तिकी माघी आषाढी च विशेषतः स्नानदानविहीना स्यात् नेयाः कं तु
नेदत्ते इति भारतेक्ता सोक्तेः अस्यां कोटलाव्रतं क्रियते तदा सा पापव्यापिनी ग्राह्या तदुक्तं हेमाद्रौ
भविष्ये आषाढपौर्णमास्यां तु संध्याकाले सुपुष्पिते संकल्पयेन्मासमेकं श्रावणे प्रत्यहं प्रत्यहं स्नानक ११

11A दिक्षे नियमतो ब्रह्मचर्येस्थिता सती भोजयामि नक्तं भूराप्यं कदिक्षे प्राणिनां दयामिति अस्य व्रतस्य हिती
पादं भन्त्रप्रोच्चावाद विभवतेव अश्वविर्यास्य चिकीर्षि पदिस्त्रीपदिवापुमान व्रतमेतन्न दुःकृत्वाम्यमतेस
वैपातके दिनितस्क दात प्रारब्धेसूतकं नस्याद नारब्धेतसूतकमिति विष्णुवचनाच्च अत्रैवव्यासः प्रजोक्ता
तत्रत्रिमह जीवित मरते तोस्र नाचतस्र वै देति निष्कर्षः इति श्री मिश्र गंगाराम आत्मज दीक्षित मणिराम कृ
ते वत्सर दीपिकायां आषाढ मासः अथ श्रावणः तत्र वामने घृतं च हत्वौरकुंभास्य घृतधेनुफलानि च श्रावणे
श्रीधर प्रीत्ये दातव्यानि विधिपूर्वकं ता श्रावणे कृष्णमधिती पापां चोद्याद पयाष्टि स्या मयूरस्याद नव्रता
रंभः कार्त्तिक कृष्णमत्त तीपापांसमाप्तिः अयं व्रतो मास चतुष्टये कृष्णघृती पापामेव नप्रसत्तं
तथाच भविष्यपुराणे अथ मयूरायनो नाम्न्याद्दितीयां पारणा आरत यामपोष्य न वैधव्यं स्त्रीप्राप्ति
नराधिप पतीविप्रयुक्त स्तु नरोन कदाचित प्रजायते पान्यस्याउपोष्य देवताउपासे स्वयं नतूप
वासः नक्तभोजन विधानात अत्र मासः पौर्णिमा सांतोग्राह्य व्रतप्रकारो वामन पुराणे यस्यां तिथौ
च स्वपिति विश्वकर्म्मा प्रजापतिः तस्यामभ्यर्च्य च हरिं श्रीवत्सं च चतुर्भुजं पर्यंक स्थ समं लक्ष्म्या गं
धपुष्पादिभिर्मुने ततः प्रसादयेन्मंत्रं प्रणम्य च जगत्पतिं श्रीवत्स धारिन श्रीकांत श्रीवास श्रीपते
अव्ययगार्हस्थ्यं मा प्रणाशं मे यातु धर्मार्थ कामदः अग्नयो मा प्रणश्यन्तु मा प्रणश्यंतु निर्जराः पाप्मगा मा
प्रणश्यंतु तत्वन्नोदांपत्य भेदतः अग्नयः अन्नयाः पाप्मगाः पितरः लक्ष्म्या वियुज्यते देवान कदाचि

ग्र·वि· घ्ययाभवान् तया कलत्रसंबंधो देवमामेविपूज्यतां लक्ष्म्या नक्ष्मं संवत्सरद पप्यातेष्ठा पनं सपदाशु प्याम
१२ माप्यमस्मा स्तितस्यात्रेम घुसूदन मास्मत्तत्रा: श्रणश्रपतेमा धनंमा कुलक्रमः एवंप्रस्ता धप्रजों कृत्वा चर
12 लक्ष्म्या स्तस्या हरेः फलानिदधा कर्प्यापा मभीष्टानि जगत्सते मधुरागीनतिग्रा लिनवापिकदुःका
निच रयाजेंद्र मातुलिंगानि क्रिमताविनिः सासह स्मितेनश्रीः सासह दिपमानवं तेन तत्र चंद्र
पंदद्यात् तत्र मंत्रः गगनांगणसंदीपतीव्र दिव्यापनोद्भव भाभासितदिगाभोग रमानुजनमोस्तु
ते इति ततः नक्षत्र प्रणम्याप तेने हरिं भजीत वाग्यतः हरिं प्रणम्य नक्तं भुंजीते सर्वः ततोरात्राव
तीतायां प्रातः फलादिकं सर्वं सर्वलीद द्विजाय सहितं ब्राह्मणाय दद्यात् एवं कुर्यात्ते यः सम्यक् कु
न देमास्य वत्सरं तस्य जन्मत्रयं वा रुग्गहे भंगोन जायते सभाग्यविशेषः पाद्मे ततः प्रभाते संजा
ते लक्ष्मीपतिसमन्विता दीपान्न भाजनैर्युक्तां प्याद द्याद्विजन्मने अखंडगांगाच्च विप्राय वैष्णवा
य कुटुंबिने तत्रापवेस्य दांपत्यमलं कृत्य विधानतः प्रतिमां देवदेवस्य सोदकं मां निवेदयेत् एवंय
स्तु पुमान्कुर्यात् दुग्ध सप्तापनं हरेः नतस्य विष्णु विरहः कदाचिदपि जायते न विरूपनरो कामतं दा
पुंसां जायते क्वचित् सप्तकल्प सहस्राणि विष्णु लोके महीयते दुग्धसप्तापनव्रतं स्रावणक मत्
ती पापांस्त्र वर्ण पुत्रायां पावि लप्पजा स्तीपा स्या उले कुह्मा पास्माच्छु वर्णसंभुता तस्मात् पूज्यतोगावि
दं तद्विमंगंस्मास्मा पुष्पादित्तिहेमान्नौ विमस्प पर्मेत्तरे स्रावर्णश्रद्धायां चतुर्थ्यां दूर्वागणपतिव्रतं स्राव

12A

लक्ष्मलक्षं पंचम्यां षष्ठ्यां पुतायां द्वादस्यामथवा तः सर्वान्विलिख्य प्रजपेत् तत्स्वरूपं मात्स्ये नागाश्चैव तु कर्त्त
व्याः स्वकुरवेर कधारिताः ग्रथः सर्पाकृतिस्तेषां नाभेरूर्द्ध्वं तु पोरुषी फणलक्षणं कुण्डिका कर्त्तव्याग्निहुहाव
हवः समाः इति तत्स्वरूपं विशेष स्मा वायो मासि पंचम्यां भक्त्या प्रेतनरान्दे पूजयंतो हये कुर्वन्ति नागानन्न्यित्रि पु
रस्सराः नते षां सर्पतो वीरभयं भवति कुत्रचिदिति श्रावणे मत्सूक्त कादृश्यां दृष्ट्वा व्रतस्यैकल्पयेत् दधिभा
त्र पद्धेत्त्वमेतिदिति पूर्वोक्तेः अत्र तक्रादीनां निषेधः तत्र दधिरसोपलभाते श्रावणे मास्ये कादृश्यां विहिम
व पवित्रारोपणं स्त्रेत्रास्मं भवेस्त्र वणे नक्षत्रे पंचम्यां पौर्णमास्यां वा कर्त्तव्यं शिवाय तत्तु चतुर्दश्यामष्टम्यां
वा एवं सर्वेषामपि स्वस्वतिथौ कार्यं पवित्रस्वरूपं रामार्चनचंद्रिकायां मत्स्ये हेमरौप्यताम्रक्षौमैः सूत्रैः
कौशेयपद्मजैः कुशैः सूत्रैश्च कार्पाससूत्रं ब्राह्मण्या कर्त्तितं शुभैः कृत्वा त्रिगुणितं तस्तु त्रिगुणेन कुर्यात्
येत् तेनोत्तमं पवित्रं तु षष्ठ्याः सहस्रादि त्रिभिः ३६० सप्तत्यासहितं शतं भ्यां ज्ञाताभ्यां मध्यमं स्मृतं २७० साशी
तिनाम्नाते १८० नैव कनिष्ठं तत्समाचरेत् साधारण पवित्राणि त्रिभिः सूत्रैः समाचरेत् एवं सूत्रविकल्पं
कृत्वा ग्रंथिविकल्पस्तत्रैव उत्तमं तु शतग्रंथि पंचाशद्ग्रंथि मध्यमं कनिष्ठं तु पवित्रं स्यात्षट्त्रिंशद्ग्रंथि
शोभितं पवित्रारोपणे चतुर्विंशतिग्रंथिकानामधिकारः तत्र मंत्रः एतौ देवेतिमंत्रेण द्विजो विष्णवे निवेदयेत्
शूद्रस्तु मूलमंत्रेण वा पेन वा प्रजपेद्धरिमिति देवताविशेषांतेष्वयो विष्णुरेकस्य धनदस्य १ इभमार्गो
रीश्च गणेशः ४ सोमस्य ५ गुहः ६ भास्कर ७ शंभु ८ कांति ९ वासुकि १० ऋषि पार्थिवः ११ चक्रपाणि १२ स्वनं

नै१ त४

गाम्य॥१२॥ श्रावो॥१४॥ ब्रस्ता॥१५॥ तेष्वेव च प्रतिपत्त्रस्मृतिसेवेताः प्रजाः। तेष्विष्टा देवताः पश्यो क्ताः मूलपदेनुति
पपः श्रावण्यामिति इति पवित्रारोपः। अथोपाकर्म तच्च बह्वृचैः श्रावणे श्रवणेन हस्तेन कार्यं याजुषैः श्रावण्यां
सामगैः सिंहस्थे सूर्ये हस्तेन हस्ते तथा च प्रयोगरत्ने कः। अथातः श्रावणे मासि श्रवणेन युते दिने श्रावण्यां श्रावणे
मासे पंचम्यां हस्तसंयुते दिवसे विदधीत उपाकर्म यथाविधि। अथापराकृतिकुर्यात्त्रोपासवर्जिते तिप
यान्दितमितनेन बह्वृचैः श्रवणयुतदिने यजुर्वेदिभिः श्रावण्यां सामगैर्हस्तयुक्तपंचम्यामुपाकर्म कार्यं
हस्तर्क्षः अत्र हस्तयुक्तपंचम्युक्ता कादिकायां तु तन्मात्रे हस्तयुक्तायां पंचम्यां वा तदभावे इत्युक्तं केवलपं
चम्यां हस्तयुतेन्यस्मिन्दिने इति हेमाद्रौ व्याख्यानात् केवलपंचम्यामपि कार्यं अत्र बेलम्साह द्वियपोगे व्या
सः। धनिष्ठयायुते कुर्याच्छ्रावणं कर्म यद्भवेत् तत्तत्कर्मफलं ज्ञेयमुपाकरणसंज्ञिते श्रावणे नतु यत्कर्म
मुत्तराषाढसंश्रितं सावेत्तरस्मात्ताध्यापस्तेत्ततां एतदवनमप्ति इत्युक्तं उत्तरदिने धनिष्ठायुक्तश्रवणे ता६
भवति धनिष्ठाप्रतिपद्युक्ते त्याज्यत्वे तस्मिन्नित्ते श्रावणं कर्म कुर्वीरन्नृग्यजुः सामपाठकाः इति पारि
शिष्टे तेऽश्र एतच्च पूर्वाह्णे कार्यं भवेदुपाकृतिः पौर्णमास्यां पूर्वाह्ण एव तु इति प्रचेतोवचनात् उदयेसंगवस्पर्शे
कृते पर्वणि वा कुर्यात् भे कुर्युर्नभस्युपाकर्म ऋग्यजुः साम्नगाः क्रमात् इति पृथ्वीचन्द्रोदये ततद्वचनात्तूदय
पसंगवस्पर्शादृतिस्मृता दोषविचन्त्येति अपराह्णक त्रियमिति वचनेन तु सामगादिविषयं ज्ञेय उपाकर्मदिने संक्रां
त्यादिदोषे तु उपाकर्म न कुर्वीत न कर्मास्तामर्ग्यजुर्विदः ग्रहसंक्रान्तियुक्तेपि भह स्मश्रावणपर्वस्विति हेमा

13A

ष्ठौ निषेधात्तं च मस्मादुपोगोएण कालगास्याः एतस्यापवादमाह गार्ग्यः अर्द्धरात्रादधस्तात्संक्रांतिर्यदि हं
तथाउपाकर्म न कुर्वीत परतश्चेन्न दोषकृदिति इदं च कर्कसंभानौ निषिद्धं सिंहस्थे कन्ये अन्ये सिंहादि वचनं न
तन्मतानि वचनानीति केचित् अस्मत्तु प्राच्यास्तु वंद्येष्वस्मो न दमिति एतस्य निर्वद्धे दर्शनादनाकर मित्ता
कः तथा च मस्यकाले संक्रांत्यादि दोषवर्जं वै: श्रावण पूर्णिमा पंचम्यां वाजसनेयिनां रक्तार्तिदेशेत्र यजुर्वेदिभिर्भा
द्रपदा पे षपमट्टैस अप्रोद्धौ दृत्तौ तैराषाढ्यां वाजसनेयिभिस्तु श्रावण्यां शुक्लपंचम्यां गोणकालेकार्यमुपाकृति
स्तु पंचम्याकार्या वाजसनेयिभिरितिस्मृतिमहार्णव वचनात् वाजसनेयि गृह्य एपे षांग ये पंचम्युक्ता तेषांस्म
वेषां मपलेनाएण उपाकरणविधिस्तु संस्काररत्नेद्रष्टव्याः तत एव तत्र तत्रवृत्ते पाकर्म अप्यप्रसंगादत्रैवोल्ले
ज्जेन मुच्यते तत्र पौष मासे रोहिण्यां तत्कृत्यमोषध्यां वा पौषमासस्य रोहिण्याम अष्टकायामथापि वा इति पारस्करवल्का
त श्रावण्यां प्रौष्ठपद्यां चोपाकृतानां क्रमेण पौषस्य शुक्लप्रतिपदि माघस्य शुक्लप्रतिपदि वा कार्यं अर्द्धपंचमासान् धी
यीते ति तत्रैवोक्तेः पक्षतुल्पीतः अर्द्धपंचमान्मासान् धीतो ऽसि सृज्जेत पंचार्द्ध षष्टान्वेति नत्वश्वाधायतु पाकर्म
विषये बौधायनाक्षपौष्यां माघ्यां वा कुर्यात् पौष्यां माघ्यां वोत्सृजेतत्र इति बौधायन स्मृतौ वह्वृचैस्तु मा
घ्यां कार्यं अत्रैवापोत्सर्जनं माघ्यां पौर्णमास्यां विधीयते इति कारिकोक्तेः कात्यायनस्तु भाद्रपदे कृष्णे उत्सर्गं
मेवतदानेषति श्रावण्यां प्रौष्ठपदे पि वा कात्यायनोक्तः सामगास्तु सिंहार्के भाद्रे कुर्युः सिंहे हस्ते वान् तु भाद्रपदेऽपरे वा
ह्येविचरे हस्ते: छंदोगामिलिताः कुर्युरुत्सर्गं सर्वं छंदसामिति गार्ग्यवचनात् सर्वैरुपाकर्मदिने कार्यं वा

प्र.वि. पृष्ठे उत्सर्जनं कुर्यादुपाकर्म दिने पिबेत् तिले मा द्वैस्वादिरगत्सोक्ते: अत्र विशेषमाह कार्ष्णाजिनि: [illegible] पदाभा
१९ प्रपदे हस्तेन तत्रान्त्राकु पृष्ठे भवति तत्रस्नानं वेला वि कुर्यु: मासे प्रोष्ठपदे ह[illegible] स्नात्वै वं पृष्ठ्या भवेद्यदा तदा वृ
14 श्रावणे वा कुर्यादुत्सर्गं छन्दसां द्विज: इति तत्रैव परिशिष्टोक्ते: अत्र विशेषमाह कार्ष्णाजिनि: उपाकर्मणि चोत्सर्गे
पपाकाले समे स्तन अपीन्द्र भमपान्कृत्वा प्रजपेत्तर्पयेन्नित इत्युत्सर्गकाले: अत्र सामे व रत्नावधनमुक्तं भ
विष्णान्तरे ने तो परा हूसम पेरन्हो: पो [illegible] लिकं [illegible] कादपेत्वादते: सात्वे: सिद्धार्थे हे मध्यस्थिते: तथा भद्रापा
येन कृती श्रावणी फाल्गुनी तथा श्रावणी नृपतिं हन्ति राष्ट्रं दहति फाल्गुनी इति तेन भद्रा तेन रात्रावपि रत्नाव
धनं कार्यं तत्र बंधनमंत्र: येन बद्धो बली राजा दानवेंद्रो महाबल: तेन त्वा प्रतिबध्नामि रक्षे मा चल मा चलेति
पद्धि ७ रत्नावबंधने सर्वे ब्राह्मणा: [illegible] ते त्रिपेवैस्पे: [illegible] सम्पन्नावे: वर्ती [illegible] दितोचारो द्विजान्स पूज्य श्रा
कित इति विश्वतात् अत्रैव प्रसंगाच्छिरगनेरुत्सर्गविधिर्लिख्यते तत्र कात्यायन: अथ प्रावण्यां पौर्णमास्यां गेनश्रोत्स
र्गविधिं वक्ष्यामो मयकु [illegible] तिलस्य मनसम्मा हत्वोदकांतं गत्वाप्सु चोदके स्थाप्य मल्लेत्वा नकुत्वा विधि
वत्स्नानं माचेरत्तत: पाद प्रक्षालनादि पूर्णप सावित्रीपादमानं ना तव विधाय तत: पात्रमित्सपामार्गेण काण्ड
त्वोडा दिति दूर्वया मार्जनं तर्जलेन घ मर्षण त्रिरावर्त्य तोनीर्य धौते त्वा दिसंकल्प्यांते पावमानीषष्टी इनकुम
स्यागद हितं ततो गोतम्यादिसप्तर्षीन्महावाहृत्या वाल्यप्राज्ञुरका नस्थापयित्वा स्वपन्दजगुहोवामर्जनंतिरि नोर
त्रिप्रतिच्छाप्य प्रतिष्ठाप्य जपित्वा ततो वेत्येघार भ्यप्राणी प्रत्राद्यं ततर्पयेष्पुस्तनोदधापादीन्व्रवृंदिषेत्सान्दिरव २८
पा१

त्रसंतानं तस्यैव ब्राह्मणं समुद्धृतो स्विष्टं तु भाक वीयुदेति पठित्वा निषु ब्राह्मणस्य सतइत सर्वोनु ग्राप्य स मद्गंगाद्ये तिष्ठ
14A वा स्पनं पंह कामपपोवाजपंच कारे तिच्च वेन्नत्य पित्वा ध्याय जपित्वा गंधमाल्यादिभिर्ब्राह्मणान भ्यर्च्याशिषो
मंत्रोक्तग्रहीत्वा गृहमागच्छेत् ॥ सूत्रार्थस्तु प्रयोगेनैव स्पष्टो ज्ञातव्यः इति कात्यायन कृतो निर्गमने रूत्सर्गविधिः
अथ प्रयोगः यथोक्तमदमार्ग गोमयं कुशान् तिलान् समिध आमि दूर्वामपामार्ग मृषिस्या पनार्थं यज्ञपा
त्रपीठं वा आदाय सममना नद्यादिकं गत्वा तत्तीरे शुचौ देशे पष्यकुस्यापपेत ततस्तत्र मलक्षालनादि नाम्मला
प कर्षणं स्नानं कार्यं ततः पादौ पाणी च प्रक्षाल्य कुशहस्तो बद्धशिखो जले स्थले चैकैकं पादं कृत्वा ग्रतरू वोरु
रत्नीकृत्य अंगुष्ठक निष्ठकाव्यतिरिक्तांगुलि त्रयमे की कृत्य दक्षिण हस्तेन माषमज्जनपरिमितं जलमादाय
अंगुष्ठमूलस्य ब्राह्मणतीर्थेन त्रिवारं शब्दमकुर्वन् पिबेत् ततोंगुष्ठमूलेन मुखं द्विः प्रमृज्य अंगुष्ठमूलेन पु
नरोष्ठौ तर्जनीमध्यमानामिकाभिर्मिलिताभिर्वा स्यं परिस्पृशेत् ततो मिलिताभ्यामंगुष्ठतर्जनीभ्यां पयप कृ
पयक् नासारंध्रद्वयं तथैव वानामिकांगुष्ठाभ्यां चक्षुषी ताभ्यामेव च पयप कृपयक् कर्णौ तत अंगुष्ठ कनिष्ठकाभ्यां
नाभिं जले न हृदयं हस्तावन्येन शरूद्धयं पंचांगुलिभिः शीर्षमिति मुकारेणाचामेत् ततः ॐ मन्त्र सस्य पुनः
शेफ ऋषिर्वरुणो देवता त्रिष्टुप्छंदः जलाभिमंत्रणे विनियोगः ॐ उरुं हि राजा वरुणश्चकारसूर्याय पंथा
मन्वेतवा उ अपदे पादाप्रतिधातवेकरू तापवक्ता हृदयाविधश्चित् इतिमंत्रेण तोयमभिमंत्रयेत ततो यत्ते इत्
मितिमंत्रस्य वामदेव ऋषिः वरुणस्सविता विष्णुर्विश्वेमरुतस्तत्कीर्दे देवताः त्रिष्टुप्छंदः तोयावर्त्तने विनियोगः

ग्र॰वि॰
१५
15

ॐ ये ते शतं वरुणं ये सहस्रं यज्ञियाः पाशा वितता महान्तः तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुंचंतु मरुतः स्वर्काः
इति मंत्रेण जलं दद्यात् तेन हस्तेन दद्यात् एवं त्रिवारं त्रिर्मार्जयेत् ततः सुमित्रियान इति मंत्रस्य प्रजापतिऋषिः आपो दे
वता यजुः छंदः जलदाने विनियोगः ॐ सुमित्रिया न आप ओषधयः संतु इति मंत्रेण जलं जलांजलिना गृहीत्वा दुर्मि
त्रिया इति मंत्रस्य प्रजापतिऋषिः आपो देवता यजुः छंदः सेचने विनियोगः ॐ दुर्मित्रियास्तस्मै संतु योऽस्मान्द्वे
ष्टि यं च वयं द्विष्मः इति मंत्रं पठित्वा द्वेष्यं उद्दिश्य निक्षिपेत् तस्यां दिशि निषिंचेत् ततः कटिं वस्त्रं ऊरू जं
घे च गुल्फौ कर्णौ प्रसेकं मृदा लेपयेत् तीर्थेः चारप्रस्तालनं आचम्य उदकाचमनम् इति उदकं नमस्कुर्यात् ततः द्रु
पदादिवेति मंत्रस्य मेधातिथिऋषिर्विष्णुर्देवता गायत्री छंदः अंगालेपने विनियोगः ॐ द्रुपदादिव मुमुचा
नः स्विन्नः स्नातो मलादिव पूतं पवित्रेणेवाज्यमापः शुंधंतु मैनसः इति मंत्रेण मृदा मस्तकमारभ्य नाभिपर्यंतं नाभिमारभ्य
पादपर्यंतं वामेन समस्तकलागान्यालभेत् ततस्तु हमीर्षः प्रतिमज्जेत् आपो अस्मानिति मंत्रस्य
प्रजापतिऋषिः आपो देवता त्रिष्टुप् छंदः स्नाने विनियोगः आपो अस्मान्मातरः शुंधयंतु घृतेन नो घृतप्वः
पुनंतु विश्वं हि रिप्रं प्रवहंति देवी इति निमज्य उदिदाभ्यः शुचिरा पूत एमि इति मंत्रेण उन्मज्य पुनस्तु हमीर्षः निमज्य उ
न्मज्य आचामेत् मानस्तोक इति मंत्रस्य कुत्सऋषिः रुद्रो देवता जगती छंदः गोमयेनांगालेपने विनियो
गः मानस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः मा नो वीरान् रुद्र भामिनो वधीर्हविष्मंतः
सदमित्त्वा हवामहे इति मंत्रेण गोमयेनांगानि विलेपयेत् ततो गोमयमपनीय पूर्ववत्स्नात्वा आचम्य इति मं
त्रेण भस्मना अंजलिना वामकरे मार्जयेत् मंत्रोपयोगः इमं मे वरुण मंत्रस्य शुनःशेप ऋषिर्वरुणो देव १५

त्ता गायत्री छंदः अभिषेके विनियोगः इमंमे वरुण श्रुधी हवमद्या च मृडय त्वामवस्युराचके तत्त्वायामी
तिमंत्रस्य शुनःशेप ऋषिर्वरुणो देवता त्रिष्टुप् छंदः अभिषेके विनियोगः तत्त्वायामि ब्रह्मणा वंदमा
नास्तदाशास्ते यजमानो हविर्भिः अहेडमानो वरुणेह बोध्युरुशंस मा न आयुः प्रमोषीः २ त्वन्नइ
तिमंत्रस्य वामदेव ऋषिरग्निर्देवता त्रिष्टुप् छंदः अभिषेके विनियोगः त्वन्नो अग्ने वरुणस्य विद्वान्दे
वस्य हेडो अवयासिसीष्ठाः यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत् ३ सत्वन्नइ
तिमंत्रस्य वामदेव ऋषिर्वरुणो देवता त्रिष्टुप् छंदः अभिषेके योगः सत्वन्नो अग्नेवमो भवोती नेदि
ष्ठो अस्या उषसो व्युष्टौ अवयक्ष्व नो वरुणं रराणो वीहि मृडीकं सुहवो न एधि ४ मा प इति मंत्रस्य प्रजा
पति ऋषिर्हृदयमलं देवता यजुः छंदः अभिषेके विनियोगः मा पो मौषधीर्हिंसीर्धाम्नो राजंस्ततो
वरुण नो मुंच यदाहुरघ्न्या इति वरुणेति शपामहे ततो वरुण नो मुंच ५ उदुत्तममिति मंत्रस्य शुनःशेप
ऋषिर्वरुणो देवता त्रिष्टुप् छंदः अभिषेके विनियोगः उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्र
थाय अथा वयमादित्य व्रते तवानागसो अदितये स्याम ६ मुंचंत्विति मंत्रस्याथर्वण भिषक् ऋषिः ओषधयो दे
वता अनुष्टुप् छंदः अभिषेके विनियोगः मुंचंतु मा शपथ्यादथो वरुण्यादुत यमस्य पड्वीशात्सर्वस्मा
देवकिल्बिषात् ७ अवभृथेति प्रजापति ऋषिर्यज्ञो देवता अनुष्टुप् छंदः अभिषेके विनियोगः अवभृथ निचु
पुण निचेरुरसि निचुंपुणः अवदेवैर्देवकृतमेनो यासिषमवमर्त्यैर्मर्त्यकृतं पुरुराव्णो देव रिषस्पाहि ८ तत्त

अ॰ वि॰
१६
16

स्तु॥ इति विमज्ज्योन्मज्ज्याचामेत् ततो वत्सप्राग्रैः कारादिभिर्मंत्रैः प्रतिमंत्रं कुशात्रयेण सजलेन शीर्षमा
र्जनं पावित्र्यं तदुक्तं गृह्यसूत्रेन मार्जनं कुर्यात् मंत्रा यथा ॐकारस्य ब्रह्मा ऋषिः परमात्मा देवता गायत्री
छंदः पावने विनियोगः ॐ पुनातु महाव्याहृतीनां प्रजापतिऋषिः परमात्मा देवता गायत्री छंदः पाव
ने विनियोगः ॐ पुनातु महाव्याहृतीनां प्रजापति ऋषिः अग्निवायुसूर्या देवता गायत्र्युष्णिगनुष्टुप् छंदां
सि पावने विनियोगः भूः पुनातु २ भुवः पुनातु ३ स्वः पुनातु ४ तत्सवितुरिति विश्वामित्र ऋषिः सविता देव
ता गायत्री छंदः पावने विनियोगः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् पुनातु ५
आपो हि ष्ठेति तिसृणां सिंधुद्वीप ऋषिः आपो देवता गायत्री छंदः पावने विनियोगः आपो हि ष्ठा मयो भुव
स्तान ऊर्जे दधातन महे रणाय चक्षसे पुनातु ६ यो वः शिवतमो रसस्तस्य भाजयतेह नः उशतीरिव मात
रः पुनातु ७ तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ आपो जनयथा च नः पुनातु ८ इदमित्यस्य प्रजापति
ऋषिः आपो देवता महापंक्तिश्छंदः पावने विनियोगः इदमापः प्रवहतावद्यं च मलं च यत् यच्चाभिदुद्रोह
अनृतं यच्च शेपे अभीरुणं आपो मा तस्मादेनसः पवमानश्च मुंचतु ९ हविष्मतीरिति प्रजापति ऋषिः लिंगो
क्ता देवता अनुष्टुप् छंदः पावने विनियोगः हविष्मतीरिमा आपो हविष्मान् आविवासति हविष्मान् देवो अध्व
रो हविष्मां अस्तु सूर्यः पुनातु १० देवीरापइति प्रजापति ऋषिः आपो देवता पंक्तिश्छंदः पावने विनियोगः दे
वीरापो अपांनपात् यो व ऊर्मिर्हविष्य इंद्रियावान्मदिंतमः तं देवे भ्यो देवता दत्त शुक्रपेभ्यो येषां भाग
स्थ पुनातु ११ कार्षिरसीति प्रजापति ऋषिः आपो देवता अनुष्टुप् छंदः पावने विनियोगः कार्षिरसि समुद्रस्य १६

ताद्विता उन्न पासि समापो अद्भिरगमत समोषधीभिरोषधीः पुनातु १२ आपो देवता इति वृहस्पतिऋषिः आपो
16A देवता त्रिष्टुप् छंदः पावने विनियोगः आपो देवा मधुमतीरगृभ्णन्नूर्जस्वश्चितानाः याभिर्मित्रावरूणावभ्य
षिंचन्याभिरिंद्रमनयन्नत्यरातीः पुनातु १३ द्रुपदादिवेति प्रजापत्य ऋषिः सरस्वती ऋषयः आपो देवता
अनुष्टुप् छंदः पावने विनियोगः द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव पूतं पवित्रेणेवाज्यमापः शुंधंतु
मैनसः पुनातु १४ मान्नइमस्स दंभगाय वेल ऋषिः आपो देवता अनुष्टुप् छंदः पावने विनियोगः शंनो
देवीरभिष्टय आपो भवंतु पीतये शंयोरभिस्रवंतु नः पुनातु १५ अपां रसमिति वृहस्पतिऋषिः रसो देव
ता अनुष्टुप् छंदः पावने विनियोगः अपां रसमुद्वयसं सूर्ये संतं समाहितं अपां रसस्य यो रसस्तं वो गृ
ह्णाम्युत्तमं पुनातु १६ आपो देवीरिति सस्य सिंधुद्वीप ऋषिः आपिल्प कुदमा रिलिं देवता अनुष्टुप् छंदः पावने
विनियोगः आपो देवीरुपसृज मधुमतीरयक्ष्माय प्रजाभ्यः तासामास्थानादुज्जिहतामोषधयः सुपिप्पलाः
पुनातु १७ पुनंतु मेति प्रजापतिऋषिः पितरो देवता त्रिष्टुप् छंदः पावने विनियोगः पुनंतु मा पितरः सोम्यासः पुनं
तु मा पितामहाः पुनंतु प्रपितामहाः पवित्रेण शतायुषा पुनातु १८ पुनंतु मेति प्रजापतिऋषिः पितरो देवता त्रिष्टुप् छं
दः पावने विनियोगः पुनंतु मा पितामहाः पुनंतु प्रपितामहाः पवित्रेण शतायुषा विश्वमायुर्व्यश्नवै पुनातु १९ अग्न
ग्नइमसस्य वैखानसऋषिः अग्निर्देवता गायत्री छंदः पावने विनियोगः अग्न आयूंषि पवस आसुवोर्जमि
षं च नः आरे बाधस्व दुच्छुनां पुनातु २० पुनंतु मेति प्रजापतिऋषिः लिंगोक्ता देवता अनुष्टुप् छंदः पावने विनियो
गः पुनंतु मनसेति प्रजापतिऋषिः लिंगोक्ता देवता अनुष्टुप् छंदः पावने विनियोगः पुनंतु मनसा धियः पुनं

प्र॰वि॰
८
17

तु विश्वायुस्तानि जातवेदः पुनीहि मां पुनातु २१ पवित्रेण पुनीहीति प्रजापतिऋषिः अग्निर्देवता गायत्री छं-
दः पावने विनियोगः पवित्रेण पुनीहि मा शुक्रेण देव दीद्यत् अग्ने क्रत्वा क्रतूंरनु पुनातु २२ यत्त इति प्रजाप-
ति ऋषिरग्निर्देवता गायत्री छंदः ब्राह्मणस्तृतीयपादुने विनियोगः यत्ते पवित्रमर्चिष्यग्ने विततमंतरा
ब्रह्म तेन पुनातु मां पुनातु २३ पवमान इति प्रजापतिऋषिः सोमो देवता गायत्री छंदः पावने विनियोगः प-
वमानः सो अद्य नः पवित्रेण विचर्षणिः यः पोता स पुनातु मां पुनातु २४ उभाभ्यां देवेति प्रजापतिऋषिः सवि-
ता देवता गायत्री छंदः पावने विनियोगः उभाभ्यां देव सवितः पवित्रेण सवेन च मां पुनीहि विश्वतः पुनातु २५
वैश्वदेवी पुनतीति प्रजापतिऋषिर्विश्वेदेवा देवता त्रिष्टुप् छंदः पावने विनियोगः वैश्वदेवी पुनती देव्यागा-
द्यस्यामिमा बह्व्यस्तन्वो वीतपृष्ठाः तया मदंतः सधमादेषु वयं स्याम पतयो रयीणां पुनातु २६ चित्पतिर्मेति
प्रजापति ऋषिः सविता देवता यजुः छंदः पावने विनियोगः चित्पतिर्मा पुनातु वाक्पतिर्मा पुनातु देवो मा सवि-
ता पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयं पुना-
तु २७ ओं पुनातु २८ ओं भूः पुनातु २९ ओं भुवः पुनातु ३० ओं स्वः पुनातु ३१ ओं तत्सवितुर्वरेण्यं भर्गो देवस्य धीम-
हि धियो यो नः प्रचोदयात् पुनातु ३२ ततः पुनर्हिमे॰ ततः तत्वा॰ तन्नः॰ सत्वन्नः॰ मापः॰ उपु॰ मुंचंतु मा॰ अवभृ-
थेत्येते ऋचः पूर्ववद्दद्यादिंचेत् ततः अपाघमिति शुनःशेफ ऋषिः अपामार्गो देवता अनुष्टुप् छंदः
अपामार्गेण परिमार्जने विनियोगः अपाघमप किल्बिषमप कृत्यामपो रपः अपामार्ग त्वमस्मदप दुःष्वप्-
न्यं सुव पुनातु ३ इति मंत्रेण अपामार्गैः पावयेत् ४ ततः कांडात्कांडादिति अग्निऋषिः दूर्वेष्टका देवता अ- ८

17A

त्रष्टुप्छंदः मार्जने विनियोगः कांड्रात्कांडात्प्ररोहंतीपुरुषः पुरुषस्परि एवानोदूर्वे प्रतनुसहस्रेण शतेन चेति मंत्रे
ण दूर्वया मार्जनं कुर्यात ४१ ततः अंतर्जले मग्नः ऋतं च सत्यं चेत्य घमर्षण ऋषिः भाववृत्तो देवता अनुष्टुप्छंदः
अघमर्षणे विनियोगः ऋतं च सत्यं चाभीद्धात्तपसो ध्यजायत ततो रात्र्यजायत ततः समुद्रो अर्णवः समुद्रादर्ण
वादधि संवत्सरो अजायत अहोरात्राणि विदधद्विश्वस्य मिषतो वशी सूर्याचंद्रमसौ धाता यथापूर्वमकल्प
यत् दिवं च पृथिवीं चांतरिक्षमथो स्वः इत्यघमर्षणं त्रिवारं पठेत द्रुपदादिवेति प्रजापतिऋषिः सरस्वत्स ऋषिपः
आपो देवता अनुष्टुप्छंदः अघमर्षणे विनियोगः द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव पूतं पवि
त्रेणेवाज्यमापः शुंधंतु मैनसः इति वा पठेत आयं गौरिति सर्पराज्ञी ऋषिः प्रजापतिऋषिः अग्निः पृश्निवररूपेण
देवता गायत्री छंदः अघमर्षणे विनियोगः आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः पितरं च प्रयन्त्स्वः
प्रेतस्मरंतिरोचना स्यप्राणादपानती व्यख्यन्महिषो दिवं २ त्रिंशद्धाम विराजति वाक्पतंगाय धीयते प्र
तिवस्तोरहद्युभिः ३ इति वा मंत्रत्रयं पठेत सशिरसं प्राणायामं कुर्यात विहरंवासमरेत ततो जलान्निःसृत्य धौ
तवाससी परिधाय मृदा ऊरू करौ प्रक्षाल्य आचम्य प्राणायामं कुर्यात तद्यथा ॐ भूरित्यासां व्याहृतीनां प्रजापतिऋ
षिः अग्निवायुसूर्यबृहस्पतिवरुणेंद्रविश्वेदेवा देवताः गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगत्यश्छंदां ऋषिर
सि प्राणायामे विनियोगः ओमापो ज्योतिरिति प्रजापतिर्ब्रह्माग्निवायुसूर्या देवता द्विपदा गायत्री छंदः प्रा
णायामे विनियोगः एवं पद्मासनादिकं स्थित्वा वज्रासनो मौनी संमीलितनयनः पूरककुंभकरेचकक्रमेण ॐ भूः
 यामे विनियोगः २
तत्सवितुरिति विश्वामित्र ऋषिः सविता देवता गायत्री छंदः प्राणायामे विनियोगः २

क्री॰ वि॰ ओं भुवः ओं स्वः ओं महः ओं जनः ओं तपः ओं सत्यं ओं तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोद
१८ यात् ओं आपो ज्योती रसोमृतं ब्रह्म भूर्भुवः स्वरों इति मंत्रात्मने सा पठेत् ततः पुष्पाण्यंबुमिश्राणि अंज
18 लिनासह कृत्तिष्ठन्नूर्ध्वं प्रक्षिप्य ऊर्ध्वबाहुः सन् सूर्यमुदीक्षमाणं मैत्ररूपस्थाने कुर्यात् मंत्रा यथा उदु
यमिति प्रस्कण्व ऋषिः सूर्यो देवता अनुष्टुप्छंदः सूर्योपस्थाने विनियोगः ओं उद्वयं तमसस्परि स्वः पश्यं
त उत्तरं देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमं १ उदुत्यमिति प्रस्कण्व ऋषिः सूर्यो देवता गायत्री छंदः सू
र्योपस्थाने विनियोगः ओं उदुत्यं जातवेदसं देवं वहंति केतवः दृशे विश्वाय सूर्यं २ चित्रं देवानामिति कु
त्सांगिरस ऋषिः सूर्यो देवता त्रिष्टुप्छंदः सूर्यो देवता सूर्योपस्थाने विनियोगः ओं चित्रं देवानामुदगाद
नीकं चक्षुर्मित्रस्य वरुणस्याग्नेः आप्रा द्यावापृथिवी अंतरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च ३ तच्चक्षु
रिति दध्यंगाथर्वण ऋषिः सूर्यो देवता पुर उष्णिक् छंदः सूर्यो देवता सूर्योपस्थाने विनियोगः ओं तच्चक्षु
र्देवहितं पुरस्ताच्छुक्रमुच्चरत् पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतं प्रब्र
वाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ४ प्रणवस्य ब्रह्मा ऋषिः परमात्मा दे
वता गायत्री छंदः व्याहृतीनां प्रजापतिऋषिरग्निवायुसूर्या देवता गायत्र्युष्णिगनुष्टुप्छंदांसि अग्निवा
य्वादित्या देवताः तत्सवितुरिति विश्वामित्र ऋषिरग्निवायुसूर्या देवता गायत्री छंदः गायत्रीजपे विनियो
गः ओं भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् इति दशवारं शतं वा सह १८

18A

त्रे वाजपेत् ततो विभ्राडित्यनुवाकं पुरुषसूक्तं शिवसंकल्पमंडलब्राह्मणोक्तरूपस्थानं कुर्यात् तेषया विभ्रा
डित्यनुवाकस्य प्रस्कण्व गायत्रस्य ग्नं ते कद्रु त्रि जमदग्निः तत्मेध कुत्सिमहितृ एष सूर्योगिरः सच्छ्रष्य पः प्रथमा
जगती तिस्रो गायत्र्य ग्नात त्रिष्टुप्प्रपदद्यानि च जगती सप्त ब्रह्मीत सूर्यस्तु त्रिष्टुभो वरुणं हां हे हे वैसतो व
ह त्वोऽग्न्या यं ते त्व ह तोऽग्ना कृ ह्मे नेति त्रिष्टुप्तपंक्त्यं तिति त्र्य प्रतिकोक्ता : ते प्रत्नपापं वे नऋति हृ पो : प्रजापति
ऋषिः द्वित्र मिति कुत्स ऋषिः ग्नाध्या जगती पङ्क्ती यात्त तो पे त्रिष्टुभो विभ्राडित्येत सर्वस्य सूर्यो देवता सूर्योपस्था
ने विनियोगः विभ्राड्बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविहुतं वातजूतो यो अभिरक्षति त्मना प्रजाः पुपो
ष पुरुधा विराजति १ उदुत्यं जातवेदसं देवं वहन्ति केतवः दृशे विश्वाय सूर्यं २ येना पावक चक्षसा भुरण्यन्तं जना
३ अनु त्वं वरुण पश्यसि ३ दैव्यावध्वर्यू आगतं ४ रथेन सूर्यत्वचा मध्वा यज्ञं ४ समञ्जाथे तं प्रत्नथा पायं वेनश्चित्र
देवानां ४ तं प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिं बर्हिषदं ४ स्वर्विदं प्रतीचीनं वृजनं दोहसे धुनिमाशुं जयं
तमनु यासु वर्धसे ५ अयं वेन श्चोदयत्पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने इममपां ४ संगमे सूर्यस्य शिशुं न
विप्रा मतिभी रिहन्ति ६ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः आप्रा द्यावापृथिवी अन्तरिक्षं ४
सूर्य आत्मा जगतस्तस्थुषश्च ७ आ न इडाभिर्विदथे सुशस्ति विश्वानरः सविता देव एतु अपि यथा युवानो मत्स
था नो विश्वं जगदभिपित्वे मनीषा ८ यदद्य कच्च वृत्रहन्नुदगा अभि सूर्य सर्वं तदिन्द्र ते वशे ९ तरणिर्विश्वद
र्शतो ज्योतिष्कृदसि सूर्य विश्वमाभासि रोचनं १० तत्सूर्यस्य देवत्वं तन्महित्वं मध्या कर्तोर्विततं संजभार य

पु.सि. २९ 19

येदुप्रकेह दिवितः सधस्थादग्नी वात्मसात्तु तेस्मिमस्मे ११ तन्मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपं कृणुते द्योरुपस्थे
अनंतमन्यद्रुशदस्यपाजः कृष्णमन्यद्धरितः संभरंति १२ बण्महाँ असि सूर्य बडादित्य महाँ असि महस्ते सतो महि
मा पनस्यतेद्धा देव महाँ असि १३ बट् सूर्य श्रवसा महाँ असि सत्रा देव महाँ असि मह्ना देवानामसुर्यः पुरोहितो वि
भु ज्योतिरदाभ्यं १४ श्रायंत इव सूर्यं विश्वेदिंद्रस्य भक्षत वसूनि जाते जनमान ओजसा प्रति भागं न दीधिम १५ अद्या
देवा उदिता सूर्यस्य निरंहसः पिपृता निरवद्यात् तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः
१६ आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्
१७ इति सूर्यपुरुषसूक्तं सहस्रशीर्षेति षोडशर्चस्य नारायणपुरुष ऋषिः पंचदशानामनुष्टुप् षोडश्यास्त्रिष्टुप् नारा
यणपुरुषो देवता सूर्योपस्थाने विनियोगः सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् स भूमिं सर्वतस्पृ
त्वात्यतिष्ठद्दशांगुलं १ पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यं उतामृतत्वस्येशानो यदन्नेनातिरोहति २ ए
तावानस्य महिमातो ज्यायांश्च पूरुषः पादोस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ३ त्रिपादूर्ध्व उदैत्पुरु
षः पादोस्येहाभवत्पुनः ततो विष्वङ् व्यक्रामत्साशनानशने अभि ४ ततो विराडजायत विराजो अधि पू
रुषः स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ५ तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यं पशूंस्तांश्चक्रे वा
यव्यानारण्या ग्राम्याश्च ये ६ तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे छंदांसि जज्ञिरे तस्माद्यजुस्तस्मा
दजायत ७ तस्मादश्वा अजायंत ये के चोभयादतः गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ८ तं यज्ञं
बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः तेन देवा अयजंत साध्या ऋषयश्च ये ९ यत्पुरुषं व्यदधुः कतिधा व्यकल्पय
धा१ २९

धानत्वात् पूजापुष्पैर्प्रकाशदेशान्तरेनवमीपर्यंतत्वात् आदिपदेनैकपकाशेकैः नवरात्रं वा विकल्पं
तत्रशाकरपक्षे नवमीति नवम्यामपूपेषु त्वा चतुर्दा निरि- अस्वनेमस्कन्दपदे नवरात्रमुक्तं तः नवमी ५२

राम·

52A पारणं कुर्यादित्युक्तमीमांसितानेवेत्याह देवी नवम्यां पारणविधायकानि तानि दिनद्वये यदा नवमी तदा
द्वितीयदिने नवमीमध्य एव पारणा तत्र केचन नवम्यां तु पारणा कार्येति विषयविलोहामिलाहृककर्म वि
धवाक्लिच्च तस्मात् पूर्वमतं एव विधानात् अत्र पारणा हि सकलकामदृष्टाभीतमध्य एव पारणा कार्या व्रत
जप ४ पक्षविवाहेतु श्राद्धहोमे सर्वत्रैव प्रारब्धे सूतकं न स्यादतो न दोषस्तत्र कमिति विष्णुवचनात् सूतके पा
रणं कुर्यान्नवम्यां होमपूर्वकं तदुक्तं भोजनं चैव प्राप्ते नदीप्राप्ते कालिकातन्त्रे इति स्कन्दपुराणवचनात् तदुक्तं तत्रको
ते एवं रात्रौ दृष्ट्वा तेवि स्त्रीणि स्तम्भध्य एव पारणा कार्या सेप्स्यन्तेभिरतनिलिनत्वात् दुर्गापूजाव्रतमिति माधा
मीपक्षे स्यक्षमाणवचनात् दुर्गापूजाव्रततत्र सर्वत्र पारणा पलन्दुलमिति सत्याराध्यानां यत्रैव सत्रान्ते होमो न
क्रियते तैः सूतकमध्ये पारणा कार्या येतु होमं कुर्वन्ति तेषां सूतकान्ते पारणा होमस्य पूजाङ्गत्वेन प्रधान
त्वात् तस्य चान न्यसाध्यत्वे नाशौचमध्ये संभवात् होमसमाप्तिं विना च विपमहूपोपवासमाप्तेः संभवा
दन्नैवेद्यन्ते होमादिकं कृत्वा पारणं कुर्यात् मित्रवधवाक्योच्यते ति निर्णयः इति पारणा निर्णयः दशम्यां देवीविस
र्जनं तत्र प्रातः पूजयित्वा दशम्यां विधिपूर्वकं संप्रेषणं तु कर्तव्यं गीतवादित्रनिस्वनैरिति देवीपुराणे
कैरवेद्दशम्यां विसर्जनं कुर्वीत तदपरा रूपंदेहि यशोदेहि भगं भगवति देहि मे पुत्रान्देहि धनं देहि सर्वान्कामा
न्प्रदेहि मे महिषघ्नि महामाये चामुण्डे मुण्डमालिनि आयुरारोग्यमैश्वर्यं देहि देवि नमोस्तु ते इति संप्रार्थ्य देवीं तु त
तत्स्थानं प्रापयेदिति दुर्गोत्सवे विवेके लिङ्गपुराणपूजाप्रकरणं च कुर्यात् समनकल्याणमहाभिः शाक्तिभिः सह गच्छ गच्छ प
रं स्थानं स्वस्थानं देवि चण्डिके व्रतस्रोतोजले वृद्धै स्थापितौ च जले त्विहेति उत्तमा व्रजजलेषु मीनवत्त्वा देवि
जगन्मातः स्वस्थानं गच्छ पूजिते संवत्सरे व्यतीते तु पुनरागमनाय वै इमां पूजां मया देवि यथाशक्त्योपपादितां रक्षा

त्र॰वि॰ र्थं त्वं समभ्युज्ज गच्छ स्वस्थानमुत्तममिति जले प्रवाहयेत् ततो गच्छन्मार्गात्पर्यंतां तिकलशोदकेन पश्चोक्तविधिना ब्राह्मणैः स्वा

५३ भिषेकं कार्यः इत्युक्त्वा प्रतिपद्दिनदशमीपर्यंतं कृतदुर्गापूजाप्रतिष्ठास्तु अर्घ्यं पश्चात् क्लिं ब्राह्मणेभ्यो दक्षिणां दत्वा ब्राह्म

53 णान्भोजयित्वा बंधुभिः सह भुंजीतेति इति दुर्गापूजा [illegible] विसर्जनविधिः अथ मेव विजयदशमी श्रुतिः परान्हे

मुख्यः कालः तत्रैव पूजा प्रोक्ता प्रदोषे गौणः तत्र दिनद्वये परान्हव्याप्तौ पूर्वा प्रदोषव्याप्तेराधिक्यात् दिनद्वये प्रदो

षव्याप्तौ परा अपरान्हे [illegible] व्याप्तिकात् श्रवणयोगस्तु जन्माष्टम्यां रोहिणीवदप्रयोजकः दिनद्वयेऽपरान्हा

व्याप्तौ तु पूर्वा तत्रापि परदिनेऽपरान्हे श्रवणसत्वे परैवेति दिवोदासीयवचनानि हेमाद्रौ स्कांदे दशम्यां

तु नरैः सम्यक्पूजनीयापराजिता ऐशानीं दिशमाश्रित्य अपरान्हे प्रयत्नतः इति अपरान्हस्य कर्मकालत्वमुक्तं तथा

या पूर्वा नवमीयुक्ता तस्यां पूज्याऽपराजिता हेमाद्रौ विजयार्थं च पूर्वोक्तविधिना नरैः नवमीशेषयुक्तायां दशम्यामप

राजिता ददाति विजयां देवी पूजिता जयवर्द्धिनीति नवमीयोगस्तोत्रे मफलदत्वमुक्तं तत्रैव तथा आश्विने शुक्लपक्षे

तु दशम्यां पूजयेन्नरः एकादश्यां न कुर्वीत पूजनं चापराजितामिति एकादशीयोगेऽत्र फलदत्वमपि तत्रैवोक्तं तेना

परान्हे मुख्यः काल इति सिद्धं श्रवणयोगे हेमाद्रौ कश्यपः उदये दशमी किंचित्संपूर्णैकादशी यदि श्रवणर्क्षं यदा

काले सा तिथिर्विजयाभिधा श्रवणर्क्षे तु पूर्णायां काकुत्स्थः प्रस्थितो यतः उल्लंघयेयुः सीमानं तद्दिनर्क्षे ततो नराः इति

कोऽत्रापरान्हे तेन श्रवणयोगोऽप्यपरान्हे वाप्येदितः काले सदुदरस्वस्थाने कार्येति लिखनं भ्रमादिति ज्ञेयं तथा च

सर्ववचनादपरान्हः पूजाकालः अस्यामेव दशम्यां राजा प्रस्थानं कुर्यात् तथाच अलंकृतो भूषितभृत्यवर्गः परिष्कृ

तो तुंगतुरंगनागः वादित्रनादप्रतिनादिताशः सुमंगलाचारपरंपराद्भीः राजा निर्गच्छ भवनात्सुमुहूर्ते पुरोगमः

प्रस्थानिकविधिं कृत्वा प्रतिष्ठेत्पूर्वतो दिशि गत्वा नगरसीमांते वास्तुपूजां समाचरेत् संपूज्य चाष्टदिक्पालान् पूजयेत्स ५३

हे॰ दश॰

53A ष्विदेवताः मंत्रैर्वैदिकपौराणैः पूजयेच्छमीं ततः । शमी पुरं जगन्मान्यं भक्तानामभयप्रदं । अर्चयित्वा शमीवृक्षमर्चयेच्छ्रुत
तः पुरः । अमंगलानां च शमनीं शमनीं दुष्कृतस्य च । दुःस्वप्नशमनीं धन्यां प्रपद्येहं शमीं शुभां । शमी शमयते पापं शमी लो
हितकंटका । धारिण्यर्जुनबाणानां रामस्य प्रियवादिनी । करिष्यमाणयात्रायां यथाकालं सुखं मया । तत्र निर्विघ्नकर्त्री त्वं भ
व श्रीरामपूजिते । ततः कृताशीः पूर्वस्यां दिशि विष्णुक्रमान् क्रमेत् । रिपोः प्रति[illegible]कृतिं कृत्वा ध्यात्वा तु मनसा च तं शरेण
स्वर्णपुंखेन विंध्येद्धृदयमर्मणि । इत्यपराजितामंत्रांश्च पठेत्तस्याः पुरोधसा । एवमेव विधिं कुर्याद्दिल्लादिदिक्षु च वि
पूज्यापराजितां पश्चात्संपूज्य सांवत्सरपुरोहितौ । गजवाजिपदातीनां प्रेक्षकौतुकमाचरेत् । प्रेक्षकौतुकमश्वादिधावनादिक
मित्यर्थः । जयमंगलशब्देन ततः स्वभवनं विशेत् । नीराज्यमानपुण्याभिर्नारीभिः समंगलं । य एवं कुरुते राजा वर्षे
वर्षे तु मंगलं । आयुरारोग्यमैश्वर्यं विजयं च स गच्छति । नाधयो व्याधयस्तस्य भवंति न पराजयः । श्रियं पुत्रमवाप्नो
ति विजयं च सदा भुवीति । ततः पदितः पूजां कुर्यात् । तदुक्तं स्कांदे दशम्यां पूजयित्वा तु सम्यग्यो चापराजितां कलशा
तो यस्य पूर्णं जयंतीपल्लवान्वितं । आम्रपत्रप्रशस्तं ते जयंतीपत्रालिकलशोपरि स्थापनीया इत्यर्थः । चतुर्थीलोक्त
यायात्रा कर्तव्या साधनेन चेति । अत्र प्रयोगः यद्दिने नाभिषारिके वामनक्षत्रं तदा पूर्वोक्तमंत्रैः श्रवणार्द्रादि राजचि
ह्नानां प्रातः पूजा कार्या ततो यथायोग्यमलंकारादिना आत्मानमलंकृत्य सपुरोहितः सेनापतिः सुतो दुंदुभ्यादिवा
द्यघोषेण स्वनगराद्बहिर्निर्गत्य शमीपं गत्वा तत्र प्रागुदीच्यां वास्तुपूजां संक्षेपतो वास्तु[illegible] पंचचत्वारिंशद्देव
तानां चतुर्थ्यंतनामभिस्तन्नाममंत्रैः कुर्यात् । तद्यथा ॐ अग्रयेत्यादिमात्रांतां विजयसिद्ध्यर्थं संक्षेपतो वास्तुपूजनमहं

शमीर

प्र॰वि॰

कलिके इति संकल्पं कुर्यात् ततो गंधपुष्पाद्यैः ओं ब्रह्मणे नमः १ ओं अर्यम्णे नमः २ विवस्वते नमः ३ स
५४ वित्रे नमः ४ विबुधाधिपतये नमः ५ आपवत्साय नमः ६ मित्राय नमः ७ राजयक्ष्मणे नमः ८ पृ
54 थ्वीधराय नमः ९ आपाय नमः १० सावित्राय नमः ११ जयाय नमः १२ रुद्राय नमः १३ शिखिने न
मः १४ पर्जन्याय नमः १५ जयंताय नमः १६ कुलिशायुधाय नमः १७ सूर्याय नमः १८ सत्याय नमः
१९ भृशाय नमः २० आकाशाय नमः २१ वायवे नमः २२ विहमवे नमः २३ वितथाय नमः २४ गृ
हक्षताय नमः २५ यमाय नमः २६ गंधर्वाय नमः २७ भृंगराजाय नमः २८ मृगाय नमः २९ पित्रे
नमः ३० दौवारिकाय नमः ३१ सुग्रीवाय नमः ३२ पुष्पदंताय नमः ३३ जलाधिपाय नमः ३४ असु
राय नमः ३५ शोषाय नमः ३६ ओं पापाय नमः ३७ ओं रोगाय नमः ३८ ओं अहये नमः ३९ मुख्याय
नमः ४० भल्लाटाय नमः ४१ सोमाय नमः ४२ ओं सर्पाय नमः ४३ ओं अदितये नमः ४४ ओं दितये नमः
४५ एवं नामभिः गंधपुष्पादिताम्नैवेद्यं प्रदिप्य वास्तुपूजां कृत्वा ततो दिग्पाः दिक्पालांश्च पूजयेत् ओं
प्राच्यै दिशे नमः निर्ऋतये नमः ४ प्रतीच्यै दिशे नमः वरुणाय नमः ५ वायव्यै दिशे नमः वायवे
नमः ६ उदीच्यै दिशे नमः कुबेराय नमः ७ ऐशान्यै दिशे नमः ईशानाय नमः ८ इति ग्रामीतहस्तपूज ५४

राम॰

54A

गत्रायं पूज्यमानेन ह्रूं पूजयेत् तत्र प्रथमं गालानां प्रतिमास्यादि श्रीरामपूजने इत्येतैर्मंत्रैः प्रा सी
पूजां कुर्यात् ततो ब्राह्मणैः कृतावीः पूर्वसंस्थां दिशि विष्णुक्रमान् क्रमेत् तद्यथा दिवि विष्णुर्व्यक्रंस्
स्त जागतेन छंदसा ततो निर्भक्तो योऽस्मान्द्वेष्टि यं च वयं द्विष्मः इति मंत्रं पठित्वा दक्षिणपादं मण्डले दक्
क्षिणस्यां तत्समीपे वामपादमपि स्थापयित्वा तिष्ठेत् ततः अंतरिक्षे विष्णुर्व्यक्रंस्त त्रैष्टुभेन छं
दसा ततो निर्भक्तो योऽस्मान्द्वेष्टि यं च वयं द्विष्मः इति मंत्रं पठित्वा पुनर्दक्षिणपादमग्रे विन्यस्य
पूर्ववत्तिष्ठेत् ततः पृथिव्यां विष्णुर्व्यक्रंस्त गायत्रेण छंदसा ततो निर्भक्तो योऽस्मान्द्वेष्टि यं च व
यं द्विष्मः इति मंत्रं पठित्वा पुनः पादमग्रे चालयेत् एवं त्रीन् विष्णुक्रमान् कुर्यात् ततः [illegible]
[illegible] दंदसूकाः प्राचीमारोह गायत्री त्वावतु रथंतरं सा
म त्रिवृत्स्तोमो वसंत ऋतुर्ब्रह्म द्रविणमिति मंत्रं ब्राह्मणाः पठेयुः तत्र ब्राह्मणाः प्रतिदिशमुपस्थाप्य
प्राङ्मुखं ध्यात्वा तस्य हृदयं [illegible] विधेयेत् एवं प्रतिदिशं वेधः कार्य एवमेव दक्षिणसंस्थां दिशि विष्णुक्र
मान् सर्वमंत्रैस्तैरेव कुर्यात् एवं प्रतिदिशं वेधः कार्य एवमेव दक्षिणसंस्थां दिशि विष्णुक्रमान् सर्वमंत्रै

णैव कुर्यात् तत्र दक्षिणभागे त्रिष्टुप् त्वावतु बृहत्साम पंचदशस्तोमो ग्रीष्म ऋतुः इदं द्रविणमिति श्राल
वि॰२ णः पठेत् पुनस्तिष्ठेवः ततः प्रतीच्यां दिशि विष्णुक्रमान् कुर्यात् तत्र प्रतीचीभागे ह जगती त्वावतु वैरूपं सा
55 म सप्तदशस्तोमो वर्षा ऋतुः विड् द्रविणमिति श्रालतोः पठनीयं ततः उदीच्यां दिशि विष्णुक्रमांस्तथैव
कुर्यात् तत्र उदीच्यां भागे ह्यनुष्टुप् त्वावतु वैराजं सामैकविंशः स्तोमः शरदृतुः फलं द्रविणमि
ति पाठः ऊर्ध्वदिशि विष्णुक्रमान् ततः समेव अवेशान् ददस्वकाद्युत्पादि मंत्रं च तत्र पपामेकार्यः ततः पूजां द्वि
पू॰जय द जो नृपः स्वसावतस्मः पुरोहितो चैं गजवाजिपदातीनां च केतुकं च प्रेदस्य प्राक्प्रमूलमदमादाय जयमंगलेभा
ढेन स्वभवनं विशेत् इति यात्राप्रयोगः ततोऽपराजितापूजां कुर्यात् सयपथा ग्रहे स्यादिदेमसिद्धयेऽपरा
त्रां वा विजयसिद्धये चैवापराजितापूजां करिष्ये इति संकल्प्य कलशस्थापनं कृत्वा तदुपरि जयंतीपत्रालिख्य स्थाप
पत्र अष्टदललिखितं नवोगंप पात्रं तदुपरि स्थापयित्वा तदुपरि हरिद्राकुंजितेन वस्त्रं प्रसार्य तत्राष्टदलं कमलं वि
लिख्य तत्कर्णिकायामपराजितालतां मूललतां पुष्पैः ॐ अपराजितायै नमः इति मंत्रेण स्थापयेत् ततस्तद्द
क्षिणभागस्थलतामेव दक्षिणीयां लतां जयाह्वयां ॐ क्रियाशक्त्यै नमः इति मंत्रेण जयां संस्थाप्य अपराजिताया
वामभागस्थले विजयाह्वयां तामेव लतां ॐ उमायै नमः इति मंत्रेण विजयां स्थापयेत् ततः ॐ अपराजितायै न
मः ॐ जयायै नमः ॐ विजयायै नमः इति प्रत्येकमावाहनाद्युपचारैः षोडशभिः पंचभिर्वा पूजां कुर्यात् ततो नमस्का
रं कृत्वा चाहूतमनुमुखपद्मेन कुंडलेन विराजिता जया देवी शिवे भक्त्या सर्वकामान् ददातु मे कांचनेन विचित्रेण
केयूरेण विभूषिता जयप्रदा महामाया शिवभाविनी चैतस्यां विजयां च महाभागा ददातु विजयं मम हारेण हविचित्रे

55A लक्ष्म कमरवा ऽपराजिता रुद्ररक्ता कदंबनु विजयं मम इति प्रार्थयेत् ततस्तस्मिन्नष्टदलहरिद्रावस्त्रे वा मुक्तसिद्धा
र्थी स्वद्विपिबलया कारे एवं बध्वा तद्धि घृर्यं वस्यायाऽभिमंत्र्य एवं कुर्यात् यथा सदाऽपराजितेयस्मात्वं लतानां त्वमास्यता
अथ सर्वकामार्थसिद्धर्थं ततस्तां वैधारयाम्यहं भवापराजिते देवि मम सर्वसमृद्धये पूजितायां त्वयि प्रेयोममास्तु दुरितं
ततः द्रुतं इति मंत्रेण वलयममभिमंत्रयेत् जयदे देवि वरदे देवि दशार्धेऽपराजिते धारयामि भुजे दक्षे जयलाभाभिवृद्धये स्याप ४
ये वलमाधेहि वलयस्यापि शत्रौपराजयं त्वद्धारणी भवेद्युग्मे धनधान्यसमृद्धयः इति मंत्रेण दक्षिणे वाहौ त
द्वलयं वध्नीयात् इमां पूजां मया देवि यथाशक्त्या निवेदितां रक्षार्थं तु समादाय व्रज स्वस्थानमुत्तमम् इति विसर्ज
येत् एवं सर्वैर्विजनाद् दशम्यामपराह्णे ग्रामसीमान्तमुल्लंघ्य ऽपराजिता पूजनीया युग्मः यथा च पुराणसमुच्चये द
शम्यां च जनैः सम्यक् पूजनीयापराजिता ऐशानीं दिशमाश्रित्य अपराह्णे प्रयत्नतः इति पूजां तु प्रार्थनावर्जं पू नाद्ध स्न ८
र्ववकुर्युः अथवा शत्रुरहद्वयेषु रवे धं कृत्वा ऐशान्यां ऐऽपराजितां पूज्यं ह मागछेत् शिष्टाचारस्त्वयमेवा
धुना प्रचरतीति ज्ञेयं स्वजनवेदनं कुर्वति अत्र संप्रदायात्प्रथमतोऽपराजितां संपूज्य कंकणं बध्वा वास्तुपू
जादिपावा विधायस्वज [illegible] रोदूद्धागहमागछेदिति क्रमो बोध्यः इति ऽपराजिता पूजा विधिः अत्र नीरा
जनमुक्तं कृत्यरत्ने तत्र मंत्रः चतुरंगबलेम ह्यं निरनिष्टं व्रज स्विह सर्वत्र विजयो मेऽस्तु त्वत्प्रसादात्सुरेश्वरि इति
नीराजनकाले तेरक्ष्य त्वं ज्योतिषे कृते नीलग्रीवं शुभं गीव सर्वकामफलप्रदं पृथिव्यामवतीर्णोऽसि खंजरीट न
मस्तुते नीराजनं रत्नावलय वैद्य यथाक्रमं [illegible] ततो दर्शने मंत्रास्तिष्ठि १

ग्र·वि· वसंतराजे स्वयोनिप्रक्तोमुनिपुत्रकस्त्वंम दृष्यतामेषिजलोहमेन सदृशएसे प्रादविनिर्मितायां त्वंखंजनर्ष्णयं
५६ मयोनमस्ते दर्शनफलंस्पान विशेषेति पितले गमेछुभुगेष्वजवाजिमहारगेभुजगपदंकुम्भलदः शुचिषाकुले
56 भुजमस्मास्थिकेश नखलोमतुषेभु द्दष्टो दुःखदत्ति बहुधाः खलुखंजरीटः दिकूफलम पितत्रेव क्षितौन्नालले
कार्यसिद्धिरतुलाभुक्तेहुताशोभवयाम्याम गनिभवंसुखंविवकलिर्लाभः समुद्रालये वायव्ये वरवस्त्रंगंधसलि
लं दिव्यांगनाचोत्तरे ऐशान्यांमरणं धुवं निगदितं दिव्स्लतांखंजने इतियेन लोहाभिसारकंकर्मनवरात्रोन कृतं
तेनछत्रादिपूजाऽत्रकार्या तन्मत्रायथा तत्रादौछत्रस्य यथांबुदःछादयति क्षितावपये मावसुंधरां नयाछादय
राजानं विजयारोग्यवृद्धये अथचामरस्य शशांककरसंकाशक्षीरोदडीरपांडुर प्रोत्साद्यदुरितंचामरा
मरवल्लभं अथध्वजस्य गंधर्वकुलजातस्त्वं माभूयाः कुलदूषकः ब्रह्मणः सत्यवाक्येन सोमस्य वरुणस्य
च प्रभावाच्च हुताशस्य वर्द्धयत्वंतुरंगमान तेजसावैवस्वतस्य मुनीनांतापसानतथा रुद्रस्य ब्रह्मचर्येण पवन
स्य बलेनच स्मरस्त्वंराजपुत्रत्वं कौस्तुभं च मणिंस्मर यांगतिं ब्रह्महागच्छेन्मातृहापितृहा तथा भूमिहाऽनृतवा
श्रु४ दीचक्षत्रियस्य पराङ्मुखः सूर्याचंद्रमसौवायुर्यावत्पश्यंति दुःकृतं ब्रजतां तांगतिंक्षिप्रं तच्चपापंभवेन्नर निवृत्तो
यदिवाक्षिप्रं लोभुद्धेध्वजतुरंगम रिपूंन्विजित्यसमरे सहभर्त्रासुखीभवेति इत्यथस्य अथपताकायाः हिरण्य
कशिपोर्युद्धे देवासुरेतथा कालनेमिवधेयद्वद्युद्धत्रिपुरघातने शोभितासितथैवाद्यशोभमयास्तोपतस्मात्
तू तवारेवतीनाम्नाकालरात्रिश्चयाखजा दहचाश्रुरिपूनसर्वान्मताकेत्वमयार्चिता इतिपताका अथगजस्य

५६

56A कुमुदैरावणौ वामनः पुष्पदंतोपवामनः सप्रतीकोंऽजनो नील एतेऽष्टौ देवयोनयः तेषां पुत्राश्च पौत्राश्च वनान्यष्टौ समाश्रि(
ताः मंदो भद्रो मृगश्चैव गजः संकीर्ण एव च वने वने प्रसूतास्ते रूपाणि गुणतोऽपि च पांतु त्वां वसवो रुद्रा आदित्याः समरुद्गणाः
भर्तारं रक्ष नागेंद्र स्वामिवत् प्रतिपाल्यतां अवाप्नुहि जयं युद्धे गमने स्वस्ति नो व्रजेति इति गजस्य अथ खड्गस्य असिर्विशस
नः खड्गस्तीक्ष्णधारो दुरासदः श्रीगर्भो विजयश्चैव धर्मधारस्तथैव च एतानि तव नामानि स्वयमुक्तानि वेधसा
दु.मा. इति कीर्तितो गुरुर्देवो महेश्वरः हि रक्ष च शरीरं ते देवतं च जनार्दनः पिता पितामहो देवस्त्वं मां पालय सर्वदा नीलजी
दु.५ मूतसंकाशस्तीक्ष्णदंष्ट्रः कृशोदरः भावशुद्धो मर्षणोऽत्यंततेजास्तथैव च इयं येन धृता क्षोणी हतश्च महिषासुरः तीक्ष्ण
धाराय शुद्धाय तस्मै खड्गाय ते नमः इति खड्गस्य अथ पंकहारस्य रक्षांसि गजान् रक्ष वाजिधनानि च मम दे
हंसकारक हारक नमोऽस्तु ते इति कहारस्य अथ धनुषः सर्वायुधमहामात्र सर्वदेवारिसूदन आममां समरे रक्ष
साकं शरवरैरिह ध्वजं कृत्वेन रक्षार्थं संहारार्थं हरेण च त्रयी मूर्तिगतं देव धनुरत्नेन मामवह इति धनुषः अथ सिंहास
स्य विजयो जयदो जेता रिपुघाती शुभंकरः दुःखहा धर्मदः शांतः सर्वारिष्टविनाशनः एते वै सन्निधौ यस्मात्तव सिंहा
महाबलाः तेन सिंहासनेति त्वं वेदे मंत्रैश्च गीयसे नमस्ते सर्वतोभद्र भद्रदो भव भूपतेः त्रैलोक्यजयसर्वस्व सिंहासन नमो
स्तु ते इति सिंहासनस्य तथैव कर्मचिह्नानि स्वाति रूपाणि शिल्पिभिः स्युक्तानि सर्वे रत्नस्व जीयसाध्य तानि नाममंत्रैः पूजया
नि अश्वाश्च गजयोर्नगरे भ्रमणमुक्तं देवीपुराणे धृतपल्यायनान अश्वान् गजान् अश्वसमलंकृतान् भ्रामयेन्नागरे नित्यं न
दिपो बहुरः सरदिति इति दशमीस्त्रपूजा अपराजितापूजनं नित्यं पूर्वाह्णे वा कार्या इति विजयदशमी आश्विनशुक्ला

पूर्व

प्र·वि· ५७

57

प१

पौर्णमासीपराग्राह्या सावित्रीव्रतमंतरेणभवतोऽमापौर्णमास्योपरे इति दीपिकोक्तेः अत्रैवाश्वयुजीकर्मोक्तमाश्वलायनेन
आश्वयुज्यामाश्वयुजीकर्मेति तत्रपूर्वाह्नव्यापिनीग्राह्या देवकर्मत्वात् आग्रयणं तु पर्वणि कार्यं प्रारंभोग्रहणं नाम पर्वणि स्यात्
तदुच्यते इति शौनकोक्तेः तत्रापिशेषपर्वणि कार्यं तेष्वाग्रहणं दर्शे स्याः पर पौर्णमासे स्याश्व पूर्वे भवति दर्शे स्याः पर
मुक्तमाग्रयणं कृत्वा पौर्णमास्यां च तदिति दीपिकायां ५ इदं च मलमासे कार्यं जनायदिशुद्धमासे एव कार्यं अस्याऽकरणे
प्रायश्चित्तमुक्तं कारिकायां अकृताग्रयणोऽश्नीयान्नवान्नं यदि वै नरः वैश्वानरायकर्तव्यश्चरुः पूर्णाहुतिस्तथा इदं को पं५
३ मुदीसंज्ञा अत्रकृत्यं महाभारते पूर्णमाश्वयुजे मासे कौमुदी परिकीर्तिता कुमुद्यां पूजयेल्लक्ष्मीमिंद्रमैरावतस्थितं
निशि जागरणं कुर्याद्दत्तकौड्यादिभिर्नरः निशीथे वरदा लक्ष्मी कोजागर्तीति भाषिणी तस्मै वित्तं प्रयच्छामि अक्षैः क्रीडां
करोति यः इदं कोजागरव्रतं तु यद्दिने पूर्णा प्रदोषार्द्धरात्रौ उभयव्यापिनी तद्दिने कार्यं नक्तादिव्रतयोगे तु रात्रियोगः प्र ३५
शस्यते इति वचनात् अत्र घृत पूर्णपात्रं विप्राय दत्त्वा दीप्ताग्निर्भवतीति विष्णूक्तेः विष्णुधर्मोत्तरेपि आश्वयुज्यां
कांस्यपात्रे घृतं पूर्णं द्विजातये ससुवर्णं तथा दत्त्वा दीप्तौजास्त्विह जायते इति इति दी॰ मणिरामकृते श्रीमदनूपवि
लासे धर्मोद्योते वत्सरकृत्ये आश्विनसमाप्तः अथ कार्तिकमासः तत्र कृत्यं वामने रजतं कनकं दीपान्मणिमु
क्ताफलादिकं दामोदरस्य प्रीत्यर्थं प्रदद्यात्कार्तिके नरः इति अथ कार्तिकस्नानं तस्य तु० आश्विनशुक्लैका
दश्यां॥

विष्णुस्मृतिपारिजातयोः तुलामकरमेषेषु प्रातःस्नानं विधीयते हविष्यं ब्रह्मचर्यं च महापातकनाशनमिति॥

57A पौर्णमास्यां तुलासंक्रांतिदिवसे वा प्रारंभः कार्यः सर्वत्र वचनं दर्शनात् यथा विष्णुरहस्ये प्रारभ्यैकादशीं शुक्लामाश्विन स्यतु मानवः प्रातःस्नानं प्रकुर्वीत यावत्कार्तिकभास्करः हेमाद्रौ सौरपुराणे पूर्णिमामाश्वियुजे मासि पौर्णमास्यां समा हितः इति शुक्लस्य मासं समग्रं परया च भक्त्या समाप्यते कार्तिकपौर्णमास्यामिति तत्र संक्रांतिमारभ्येति प्राच्यानां मतं एकादशीमारभ्य पूर्णिमांतमिति सर्वेषां मतं कार्तिकस्नाने देशाः पाद्मे कार्तिकं प्रक्रम्य कुरुक्षेत्रे कोटिगुणो गंगा यामपि तत्समः ततोऽधिकः पुष्करे स्याद् द्वारवत्यां च भार्गव पुण्यायुर्यस्य संतैव मनयो मधुराधिका दुर्लभः कार्ति को विप्रा मथुरायां न संशयः यत्रार्चितः स्वकं रूपं भक्तेभ्यः संप्रयच्छति स्कांदे द्वारकामाहात्म्ये निवेद्य केशवे मालां तुलसीदलसंभवां वहते यो नरो भक्त्या तस्य नैवास्ति पातकं नमोऽग्रां तुलसीमालां धात्रीमालां विशेषतः महा पातकसंहर्त्री धर्मकामार्थदायिनीमिति विष्णुधर्मे स्वशेतु यानि लोमानि धात्रीमालाकलेवरं तावद्वर्षसह स्राणि वैकुंठे वसतिर्भवेत् मालायुग्मं तु यो नित्यं धात्रीतुलसिसंभवं वहते कंठदेशे तु कल्पकोटिं दिवं वसेत् तुल सीदलसंभूते मालेके कृष्णजनप्रिये बिभर्मि त्वामहं कंठे कुरु मां कृष्णवल्लभं एवं संप्रार्थ्य विधिवन्मालां कंठगतां पिता धारयेत्कार्तिके यो वै स गच्छेद्वैष्णवं पदम् इति पाद्मे तुलसीदललक्षेण कार्तिके योऽर्चयेद्धरिं पत्रे पत्रे मुनिश्रेष्ठ

फलं भवेत् मे भुक्तिकं फलं इति स्नानविधिः काशीखंडे कार्त्तिकेहं करिष्यामि प्रातः स्नानं जनार्दन प्रीत्यर्थं तव देवे
श दामोदर राधया सह इमं मंत्रं समुच्चार्य्य मौनी स्नायाद्व्रती नरः इति व्रतिनः अर्घ्यमंत्रोपि तत्रैव व्रतिनः कार्त्तिके
मासि स्नातस्य विधिवन्मम गृहाणार्घं मया दत्तं राधया सहितो हरे इमौ मंत्रौ समुच्चार्य्य कोर्घं महं प्रयच्छति सु
वर्णरत्नपुष्पौघपूर्णं शंखेन उत्पवान् सुवर्णपूर्णवसुधा विधीतेन दत्ता न संशयः शतं समास्तपस्तप्त्वा कृते यत्सम(
वाप्यते तत्कार्त्तिके पंचनदे सकृत्स्नानेन लभ्यते कार्त्तिके विंशतीर्थे यो ब्रह्मचर्यपरायणः स्नास्यत्यनुदिते भानौ
स्व६ भानुजातस्य भीः कुतः इति संपूर्णे स्नाने मासे शक्तौ ब्रह्मपुराणे कार्त्तिकमधिकृत्य एकादश्यादि त्रितया(
तत्रैपंचसु रात्रिषु दिने दिने च स्नातव्यं शीतला सुनदीषु च वर्जितव्यात यापि हिंसा मांस मैथुनमेव च इति काशीखंडे
वाराणस्यां पंचनदे त्र्यहं स्नायात्तु कार्त्तिके समीतेषु अल्पवपुषः पुण्यभाजो ति निर्मला इति स्कांदे कार्त्तिकमाहात्म्ये धा
त्रीच्छायां तु यः कुर्यात् पिंडदानं महामुने मुक्तिं प्रयांति पितरः प्रसादान्माधवस्य तु प्राप्येति शेषः धात्रीच्छायां समाश्रि(
त्य यो वै चक्रपाणिनं पुष्पे पुष्पे श्वमेधस्य फलं प्राप्नोति मानवः धात्रीफलविलिप्तांगो धात्रीफलविभूषितः धा
त्रीफलकृताहारो नरो नारायणो भवेत् आहारो जीर्णो धात्रीफलविषयः नूतनस्य चातुर्मास्ये निषेधात् कार्त्तिके
वर्जयेत्तद्विदलं बहुवीजकं माषमुद्ग मसूराश्च चणकाश्च कुलत्थकाः निष्पावा राजमाषाश्च आढक्यो द्वि

5 8A दलं स्मृतं कृतान्यपि जीर्णानि सर्वाण्येतानि वर्जयेत् नारदीये कार्त्तिके वर्जयेत्तैलं कार्त्तिके वर्जयेन्मधु कार्त्ति-
के वर्जयेत्कांस्यं कार्त्तिके शुक्तसंधितं कांस्यं कांस्यपात्रभोजनं काशीखंडे ऊर्जे यवान्नं पश्यपादेवान्नमथवा पुनः
वृन्ताकं शूरणं चैव शूकशिंबीश्च वर्जयेत् नारदीये कार्त्तिके तु धूमेवाथः प्राजापत्यपरोऽपि वा एकांतरोपवासो वा । स्वर
का७ त्रिरात्रोपोषितोऽपि वा षड्वा द्वादशपक्षं मासं वा वरवर्णिनि एकभक्तेन नक्तेन तथैवायाचितेन च उपवासेन भैक्षेण
राजन्नेव परमं पदं यामी यमव्रतेन त्रिविधेनासु मासं दामोदरप्रियं तिर्यग्योनिमवाप्नोति नात्र कार्या विचारणा निर्णया
का६ मृते तोयपोषिके तुलायां तिलतैलेन सायंकाले समागमे आकाशदीपं यो दद्यात् मासमेकं हरिं प्रति महतीं श्रियमा
प्नोति रूपसौभाग्यसंपदमिति दीपदानमंत्रः ऽ परार्के दामोदराय नभसि तुलायां लोलया सह प्रदीपं ते प्रयच्छा
मि नमोऽनंताय वेधसे अत्र हेमाद्र्यादिस्तपुराणे विशेषः दिवाकरे स्ताऽचलमौलिभूते गृहाद्दूरे पुरुषप्रमाणं ॥
यूपाकृतिं यज्ञियवृक्षदारुम् आरोप्य भूमावथ तस्य मूर्ध्नि कृत्वा चतस्रोऽष्टदलां कृतीस्तत्र मध्ये अष्टदलानुसारी त
त्कर्णिकायां तु महाप्रकाशो दीपः प्रदेयो दलगास्तथाष्टौ निवेद्य धर्माय हराय भूम्यै दामोदरायाप्यथ धर्मराजे प्र
जापतिभ्यस्त्वथ सत्पितृभ्यः प्रेतेभ्यः एवाथ तमस्थितेभ्य इति कृत्यतत्त्वार्णवे ब्रह्माण्डपुराणे विष्णुवेश्मनि यो दद्या
त्कार्त्तिके मासि दीपकं अग्निष्टोमसहस्रस्य फलं प्राप्नोति मानवः वराहपुराणे गृहे कार्त्तिकं कुर्यात् द्विषे गुणं

प्र·वि·

५९ कार्त्तिकीं तीर्थे तु कार्त्तिकं कुर्यात्सर्वयत्नेन भामिनि इति कार्त्तिककृष्णचतुर्थ्यां कृत्यविशेषः संवत्सरप्रदीपे आश्विने

59 कृष्णपक्षस्य चतुर्थ्यां तारावियोगतः मार्गमध्ये च स्थितः पूज्यो रामो दाशरथिः स्त्रिया दुर्गा च तत्र संपूज्या सर्वसौख्यविवृद्ध

ये इति आश्विनोत्र मुख्यचांद्रेणेति तत्रैवोक्तं इयं प्रदोषव्यापिनी ग्राह्या दिनद्वये तथात्वे परैवेति तत्रैवोक्तं इय आ२

करकचौथ ४ मेव करकचतुर्थी सा च चंद्रोदयव्यापिनी ग्राह्या उभयदिने तत्त्वे परैवा संकल्पकालमारभ्य सत्त्वात् अत्र सौभाग्यामि

वृद्ध्यर्थं गौर्याः पूजनं प्रकर्तव्यं चंद्रोदयेऽर्घदानं कृत्वा भोजनं च अत्र वा पणं सकरकं श्वश्र्वादिभ्यो देयमित्याचारो स्त्रा५

व्रतोद् मध्यदेशीयानां तेषां अथ करकचतुर्थ्युद्यापनविधिः पुराणसमुच्चये उद्यापनविधिं वक्ष्ये यथोक्तं च निबोध मे ॥

कृत्वा तु दशमे वर्षे तदुद्यापनमाचरेत् मंडले तत्र कृत्वा तु कलशं स्थापयेच्छुभं तस्योपरि न्यसेत्पात्रं गंधपुष्पाक्षतैर्युतं न२

स्नाप गौर्याः मूर्तिं विधानज्ञा सौवर्णीं स्वस्वशक्तितः तत्रस्थां पूजयेद्गौरीं नानासंभारविस्तरैः पुष्पैर्धूपैश्च दीपैश्च नानान्नै

र्वेद्यसंभवैः एवं संपूज्य विधिवत्तत्राचार्यं प्रपूजयेत् वस्त्रालंकारणैश्चैव दक्षिणाभिस्तथैव च आचार्याय ततो धेनुं दद्या४

स्वर्णाद्यलंकृतां दत्वा दक्षिणार्थं सुवर्णं च यथाविभवतोपि च वस्त्रत्रयं तथा देवि शक्तितो देयमुत्तमं ब्राह्मणान्भोजयेत्

पश्चात्सुवासिन्यो दशैव तु दद्याद्दानानि विप्रेभ्यो यथाविभवसारतः यथा एतत्करिष्यंति व्रतं गौर्याः शुभप्रदं आ

वैधव्यं सदा नार्याः सौभाग्यं च भविष्यति इत्युद्यापनविधिः अथ प्रयोगः ओं तत्सदद्येत्यादि अवैधव्यसौभाग्यधनधान्य

५९

59A पुत्रपौत्रादिसंपत्समृद्धिकपार्वतीप्रीत्यर्थं कृतकरकचतुर्थीव्रतोद्यापनमहं करिष्ये इति संकल्प्य: ततो यथाविध्याचार्य
वरणं करकचतुर्थीव्रतोद्यापनार्थं मे भिर्वस्त्रादिभिस्त्वामाचार्यत्वेन त्वामहं वृणे इति संकल्प्य तद्धस्ते वस्त्रादिकं देयं
स च तद्गृहीत्वा वृतोस्मीत्युक्त्वा वस्त्रादि परिदध्यात् ततो मंडलकरणं तदुपरि यथोक्तविधिना कलशस्थापनं तदु
परि गंधपुष्पाक्षतेन पूर्णपात्रस्थापनं तस्मिन्पात्रे वस्त्राच्छादिते सौवर्णीं पार्वतीप्रतिमां स्थापयेत् ततो विधिव
त्षोडशोपचारैः पार्वत्यै नमः इति नाममंत्रैस्तां पूजयेत् ततो दशकरकान् नाचारात्यकान् दुग्धपूरितान् वंश
पात्रस्य कूष्मांडसहितान् सिंदूरांजनानि सौभाग्यद्रव्यवस्त्रकंचुकसहितान् अग्रे स्थापयेत् पार्वत्यै निवेदयेत् करकं दद्
क्षीरसंपूर्णान्यकान्नाद्यैः प्रपूरितान् महापापस्सं पूर्णान् चिरं जीवतु मे पतिरिति मंत्रेण ततो रात्रौ जागरणं कुर्या
त् प्रातः पुनः पूजां कृत्वा आचार्याय सघटां प्रतिमां दद्यात् कृतैतत्करकचतुर्थीव्रतोद्यापनप्रतिष्ठार्थं इमां गां तन्नि
ष्क्रयीभूतं वा यथाशक्ति द्रव्यं वा तुभ्यमहं संप्रददे इत्याचार्यहस्ते दद्यात् ततः कृतैतत्करकचतुर्थीव्रतप्रतिष्ठार्थं यथाश
क्ति ब्राह्मणान् सुवासिनीश्च यथाकालं भोजयिष्ये इति संकल्प्य: ततो यस्य स्मृत्येत्यादि पाठः ततो ऽस्मात्कारणात् करक
रकानाचारात् स्वशक्त्यादि भो दद्यात् यथाशक्ति भूयसीं दद्यात् इति दीक्षितमणिरामकृतः करकचतुर्थीव्रतोद्यापन
प्रयोगः कार्तिककृष्णसप्तमी वैकुंठकल्पादिः कार्तिककृष्णाष्टमी अशोकाष्टमी अहोई इति मध्यदेशे प्रसिद्धा
स्त्रा२

प्र॰ वि॰ ऽप्रमस्थितं चन्द्रोदयव्यापिनी ग्राह्या ॥ अस्यां संतानार्थी मृद्भिः त्र्यपर्थं तं व्रतं पित्र्यपः कुर्वन्ति चन्द्रोदये ... अर्घं दत्वा भोजनं
६० कुर्वन्तीति मदनरत्ने ब्रह्मपुराणे च ॥ इति जो धर्मः कार्त्तिककृष्णद्वादशी गोवत्सद्वादशी गोवत्सद्वादशी प्रदोषव्यापि
60 नी दिनद्वये तद्व्याप्तौ पूर्वैव वत्सपूजा वत्सेश्चैव कर्त्तव्या प्रथमेहनीति वचनात् ॥ अत्र समानवर्णां सवत्सां गां गन्धादि
ना पूज्य तस्याः पदमूले अर्घं दद्यात् ॥ अर्घमन्त्रः क्षीरोदार्णवसंभूते सुरासुरनमस्कृते सर्वदेवमयि मातर्गृहाणार्घ्यं
नैतोप नमो नमः ॥ इति माषवटकादिनैवेद्यं दद्यात् तत्र मन्त्रः सुरभि त्वं जगन्मातर्देवि विष्णुपदे स्थिता सर्वदेवमये ग्रासं म
या दत्तमिमं ग्रस ॥ ततः सर्वदेवमये देवि सर्वदेवैरलंकृते मातर्ममाभिलषितं सफलं कुरु नन्दिनि ॥ इति प्रार्थयेत् ॥ म
दिने तद्दिने तैलपक्वं च स्थालीपाकं च पिष्टकं गोक्षीरं गोघृतं चैव दधि तक्रं च वर्जयेत् ॥ इति नारदः ॥ आश्विनकृ
ष्णपक्षे तु द्वादश्यादि दिनपंचकम् ॥ तिथिषु क्रमेण चरा देवैः ... श्रीराजनाविधिः ॥ श्रीराजपेषु देवानां विप्राणां गवां गु
रूणां मातॄणां ज्येष्ठानां श्रेष्ठानां जघन्यानां स्वमानतः ... इति शुक्लाभिप्राये लाभिनः ॥ कार्त्तिकः दीपदानस्या
उक्तो धात् ॥ अस्यामेव त्रयोदश्यां प्रदोषे यमदीपकं तदुक्तं स्कान्दे ॥ कार्त्तिकस्य कृष्णपक्षे तु त्रयोदश्यां निशामुखे ॥ य
मदीपं बहिर्दद्यादपमृत्युर्विनश्यति ॥ मृत्युना पाशदण्डाभ्यां कालेन श्यामया सह त्रयोदश्यां दीपदानात्सूर्य
जः प्रीयतां मम इति ॥ कार्त्तिककृष्णचतुर्दश्यां चन्द्रोदयेऽभ्यङ्गस्नानम् ॥ तदुक्तं ब्राह्मे ॥ आश्वयुक्कृष्णपक्षस्य त्रयो
दश्यां विधूदये ॥ तिलतैलेन कर्तव्यं स्नानं नरकभीरुभिः ॥ लैङ्गे शुक्राभिप्राये लाभिवयुभिः तत्पुत्रैः ॥ तथा तैले लक्ष्मी
र्जले गङ्गा दीपावल्याश्चतुर्दशीं प्रातःस्नानं तु यः कुर्याद्यमलोकं न पश्यति ॥ यस्मिन्दिने चन्द्रो
दये चतुर्दशी तद्दिनेऽभ्यङ्गं दिनद्वये चेत्सत्वे पूर्वदिनेऽभ्यङ्गं कुर्यात् पूर्वविद्धचतुर्दश्यां कार्येति वचनात् ॥ दिनद्व
येऽपि चतुर्दश्यभावे पूर्वदिने त्रयोदश्यामेव कार्योऽभ्यङ्ग इति निष्कर्षः ॥ पात्रे अपामार्गमध्ये तु बीजपूरा सम...

स्ना १ त्रा १ यन्त्रोऽमावास्याहतानांच भूतानां भूतदर्शयोः उज्ज्वलज्योतिषा देहे दहेयं व्योमवह्निनेति उल्कादाने मंत्रः २

60A वं श्राममेवतस्मान्नमयोऽतुनरकंमितपापवै प्रतुष्टेक्रमदः चैकवेदः इति भाषा मंत्रोपितत्रैव सीतालोष्ठस
मायुक्तं सकंटकदलान्वितं हर पापमपामार्ग भ्राम्यमाणः पुनः पुनः इति ब्राह्मे अमावास्याचतुर्दश्योः प्रदो
षे दीपदानतः यममार्गांधकारेभ्यो मुच्यते कार्त्तिके नरः एवं इति योनु पूर्वेहि प्रदोषे दीपान्दत्वा पूर्वेद्युः स्ना
यान्हि सिद्धिर्देवादयः हेमाद्रौ भविष्ये ततः प्रदोषसमये दीपान्दद्यान्मनोरमान् ब्रह्मविष्णुशिवादीनां भवने
७५ शुभमर्कं चेति यदा पूर्वेद्युर्दिने स्नानं कार्यं प्रदोषे चतुर्दशी स्नानेये यथा चोक्तं दिने नो तदा पूर्वदिने प्रदोषे दीप
दानादि कृत्वा द्वितीयदिने स्नानं कार्यं क्रमानुरोधेन कालबाधस्यान्याय्यत्वात् ज्योतिषि तुलासंस्थे सहस्रां
शौ प्रदोषे भूत१४दर्शयोः उल्काहस्ता नराः कुर्युः पितॄणां मार्गदर्शनमिति तत्रोल्काग्रहणे मंत्रः अ
ग्निदग्धाश्च ये जीवा येप्यदग्धाः कुले मम उज्ज्वलज्योतिषा दग्धास्ते यान्तु परमां गतिं तद्विसर्जने मंत्रः य मा० ८
मलोकं परित्यज्य आगता ये महालये उज्ज्वल[illegible]ज्योतिषा वर्त्म प्रपश्यंतो व्रजंतु ते इति अत्र दर्शे कृत्यं तत्र८
लैङ्गे ततः श्वेतचतुर्दश्यां भोजयित्वा तपोधनान् यो वा विप्रान्धर्ममुद्दिश्य ब्रह्मलोके महीयते नरकेभ्यश्चतु
र्दश्यां यः कुर्याद्व्रतमनुष्ठेये नतु ऋतु[illegible]प्रातेनापि प्राप्यते पुत्रपौत्रादि माघपक्षस्य कृष्णाकेन मुक्तो नरादि
नेनाः प्रेताख्यायां चतुर्दश्यां सर्वपापैः प्रमुच्यते यथा कृष्णतत्कालीने भविष्ये कार्त्तिके भौमवारे तु चित्रा
कृष्णा चतुर्दशी तस्यामाराधितः स्नातो येन विमुच्यते भौमवारे चित्रानक्षत्रयोगे महाफला इति
त्रैव कृष्णायां तथा तत्रैव यां काचित्सरितं प्राप्य कृष्णपक्षे चतुर्दशीं यमुनायां विशेषेण नियतस्तर्पयेद्य
मान् इति यमतर्पणं कार्यं धर्मराजस्य नामभिः यमाय धर्मराजाय मृत्यवे चांतकाय च इत्यादिचतु
र्दशनामभिः यज्ञोपवीतिना कार्यं प्राचीनावीतिना तथा देवत्वं च यमस्यास्ति पितृत्वं तथा जीवत्पि

का० २

प्र.वि.	नाभ्यकुर्वीत नर्दीतं यमभीरुकोपिति । इति नरकचतुर्दशी ॥ अथ कार्तिककृष्णामावास्यां दीपावलीमुत्सवः प्रवी
६१	ति चोच्यते सा प्रदोषकालमत्र व्यापिन्येव तेनाग्र्याः पूर्वविद्धात्वं प्रशस्तं यदा तु दिनद्वये प्रदोषव्याप्तिस्तदा
61	वास्यान्तदेहुमा यगा ह्वा युगमवाक्यात् । यदैक एवास्य वा सो दर्शस्तु स्यात् कदाचन तदा विज्ञाय पूर्वेद्युः प
ईकूं स्मरवन्दमृके निमित्तं चितं तो प्रहुतं वचनात् ॥ ब्रह्मपुराणे ॥ अमावास्यां च तथा देवाः कार्तिके मासि केशवा
ते । अभयं प्राप्य दैत्येभ्यः सुखसुप्ताः क्षीरोदसागरे ॥ अतो विधिवत्कार्यं मनुजैः सुखसुप्तिका दीपवत्यं
तदेवेन लक्ष्मीं पूजयेच्चापि निधि ॥ अपराह्णे प्रकर्तव्यं श्राद्धं पितृपार्वणे । प्रदोषसमये राजन्कर्तव्यं दीपमालि
का ॥ यदि पूर्वदिने कर्तुं प्रदोषे ॥ अमावास्या परदिने अपराह्णे तदा पूर्वदिने दीपदानं । परदिने श्राद्धं न
श्री दीपदानयोः क्रमानुरोधः कर्तव्यः तथा दीपदानं ... कि विप्रमित्रसुरालये चतुष्पथे श्मशाने
नदी पर्वतगोगृहे दीपमालादिपरि प्रदोषे तदनंतरं बालानाम् भोजयित्वा दैविभज्य चतुर्दशी ता न ५२
वं६	प्रदेशे कृते न भोक्तव्यं नववस्त्रोपशोभिता ॥ अमावास्यापि प्रातः अभ्यंगस्नानं कार्यं तदुक्तं भविष्योत्तरे एवं प
भातसमये तु अमावास्यां नराधिप स्नात्वा देवान्पितृनभ्यर्च्य संपूज्य प्रणम्य चेति एवं चतुर्दश्यां च दर्श
स्नानं कृत्वेत्यर्थः ॥ नारदेनापि तिथित्रयं दीपावलीवेनाभिधाय तत्र तैले लक्ष्मीरित्यादिनाभ्यंगस्नानं विहितं पौष्करे
स्वातिस्थिते रवाविंदुर्यदि स्वातिगतो भवेत् पंचत्वग्युदकस्नायी कृताभ्यंगविधिर्नरः नीराजितो महालक्ष्मीमर्चय
न् श्रियमश्नुते ॥ आदित्यपुराणे ॥ दिवा तत्र न भोक्तव्यमृते बालातुराज्जनान् प्रदोषसमये लक्ष्मीं पूजयित्वा ततः क्रमात्
दीपवृक्षास्तथा कार्याः शक्त्या देवगृहेषु च इति ॥ लक्ष्मीपूजनं तु लक्ष्म्यै नमः इति नाममंत्रेण कार्यं षोडशोपचारैः पंचोप
६१

6 IA चोरैर्वा लक्ष्मीपूज्यत्रार्चयेत् यथा नमस्ते सर्वदेवानां वरदासि हरिप्रिये या गतिस्त्वत्प्रपन्नानां सा मे भूयात्त्वदर्चनात्
तथा सुखरात्र्यां प्रदोषे तु कुबेरं पूजयेत्ततो वै तत्र मंत्रः धनदाय नमस्तुभ्यं निधिनामधिपाय च भवंतु त्वत्प्रसादा
न्मे धनधान्यादिसंपदः दीपदानमंत्रो यथा अग्निर्ज्योती रविर्ज्योतिश्चंद्रज्योतिस्तथैव च उत्तमः सर्वज्योतीना
नां दीपोयं प्रतिगृह्यतामिति अन्यदपि कृत्यं भविष्योत्तरे ततोपराह्णसमये घोषयेन्नगरान्नृपः अद्य राज्यं बले
लौकिकं यथेष्टं चेष्टतामिति लोकश्चापि गृहे गृहे सुधाधवलितानि रे रत्नचंदनमाल्याद्यैरर्चितेषु गृहे गृहे गी
तवादित्रसंघुष्टे प्रज्वलतिसुदीपके दुकूलपदनेरंगमाणिक्यभूषणे युवतीजनसंकीर्णे वस्त्रोज्ज्वलविहारिणि ॥
ले७ दीपमालास्थिरम्ये विध्वस्ताखिलतस्करे प्रदोषे दोषरहिते शस्ते दोषागमे शुभे यात्राविहारसंभारजयजीवेतिवादि
नी मित्रस्वजनसंवेष्टितस्वगोत्रज्ञातिपूजिते महताहर्षघोषेण ज्वलद्भिर्हस्तदीपकैः हर्म्यशोभां तु संपश्यन्नलंकृत
रत्नैः स्वकैर्नरैः तं दृष्ट्वा महदाश्चर्यं कृत्वैवात्मनः शुभां पतिराज्यप्रमोदं च ततः स्वगृहमाव्रजेत् एवं गते निशीथे तु जने
ग४ निद्रार्धलोचने तावन्नगरनारीभिः सूर्पडिंडिमवादनैः निःकास्यते प्रहृष्टाभिरलक्ष्मीः स्वगृहांगणात् इति अथात्र
दधिकृतं भविष्ये सर्वांगं तैलेन कालेप्रदीपज्वलितालये सर्वांगं वाचाकुशलं वाचयेत् प्रदीपचंदने
कार्यं लक्ष्मीमंगलहेतवे गोरोचनामृतं चैव दद्याद्गेहे सर्वतः विश्वरूपस्यभार्यासि पद्मे पद्मालये शुभे महाल
क्ष्मि नमस्तुभ्यं सुखरात्रिं कुरुष्व मे सुखरात्रिप्रभाते घृतम्लक्ष्मीर्भोपो हे

प्र॰वि॰ नु पापात्रिः सर्वभूतानां या च देवेष्ववस्थिता संवत्सरप्रिया या च ममास्तु शुभ सर्वमंगला माता त्वं सर्वभूतानां दे
६२ वानां सृष्टिसंभवा, आराधिता भूतले देवि गवां सान्निध्यमोस्तु ते इति इति दीपावलीप्रमाणवाक्यानि अथ कार्त्तिकशु
क्लप्रतिपदा, अस्या दीपावलीत्वात्तत्र अभ्यंगस्नानं कार्यं पूर्वोक्तनारदवचनात्, अत्र ज्योतिःक्रीडनमप्युक्तं निर्णया
मृते गवास्यमेव रात्रौ बलिपूजाक्रमविधिः कृत्वैतत्सर्वमेव हरात्रौ दैत्यपतेर्बलेः पूजां कुर्यात्तत्र पः स्वहस्तेन रात्रौ मे
मंडले कृष्णमेव बलिमालिख्य देवैः पंचरंगैः ... विन्ध्यावलीसहितं तदा चैव तु लोको आद
स्ताविजह हस्तं ततः पुष्पधान्यकुलैस्तंडुलैः संपूज्य बलिराजानं फलैः पुष्पैः पूजयेत् मंत्रस्तु पाद्मे बलिराज
नमस्तुभ्यं दैत्यदानववंदित इंद्रशत्रोऽमराराते विष्णुसान्निध्यदो भवेति यथा बलिमुद्दिश्य दीपाः तेदानानि
कुर्वंति दानं पात्रापात्रवदपात्रानुक्रमेणैव तं प्रदर्शितमिति तदेतत्पूर्वविद्धप्रतिपदि कर्तव्यं पूर्वविद्धाप्र
कर्तव्या ... दर्शे दिनमिति पाद्मोक्तेः माधवोपि ... पूर्वेद्युः ... दाचेद्दिति दव
लः ... प्रतिपत् ... गवां ... इति एते च विधिप्रतिषे
धाः पूर्वविद्धे प्रतिपदः ... द्वितीयादिने ... भवे चेत्तेषाः गवां क्रीडादिके यत्र
... ... पूजकोस्त्विति ... दिनहयेपि ... व्या
... ... द्वितीयायां ... ग्रामेत्वा ...
... ... प्रतिपदे ... प्रतिष्ठिते
... पूर्वे ... पूर्वविद्धे ...
र्वविद्धप्रसंगमवे वेदितव्यमिति निर्णयसिंधौ दिनद्वये प्रतिपदः ... भावेन पूर्वैव रात्रौ बलिपू

62A जो विधानेन कर्मकालव्याप्तित्वात् परदिने चन्द्रोदयनिषेधादिति सिद्धं तस्मिन्दिने प्रत्यूषसि विशेषस्नानादिसमु
दाये श्रीतडागं शीतवापीत्यादि स्वजातेः खलं कृत्वा तैः विशेषवस्त्रकर्तृसंप्रदायैर्बान्धवैः सह तत्स्थानि सुगन्धीकर्तुं
मंडपान्यस्मात्तैः प्रोक्षयित्वा गन्धपुष्पैस्ताम्बूलैः सर्वैस्तैः अलंकृत्य दीपमालामप्रति दीपन्ते धूपेन धूपयित्वा
पा४ पिताम्बरैः सहितैर्नैवेद्यादि च अर्पयित्वा नैवेद्यैः शोभितं संपूज्यादि जलं संकल्पितं बान्धवाः इति सविशेष योगाद्धर्मेण पा४
भावेन तिष्ठेत्स्नानपुण्यं सिद्धिः इति तदित्यादिरूपेण तत्सर्वं प्रख्यातिर्हि रूपदत्ते तेषां तत्वं वर्ष पूर्वं प्रदृश्यति
मुक्तो भोक्ता भवेद् दुर्वं स्वस्त्रैः स्वकर्मणा भविष्यति तस्मात्सह दृष्टे सद्भक्त्या कर्तव्या कोमुदीनां वै हमेवीदानवो
वैवंदि सिद्धे श्री पुण्याहं होते तत्रैव प्रभातसमये स्नात्वा तोयलीयास्ततो जनाः स्ववासितैर्नो भोदेयानि वस्त्रा
साभरणानि वेदे ति तथा गजाश्वांस्त्रयो धान्यपदातीन् समलंकृतान् मंचाद्युत्तः स्वयं पश्येद्युत्तेनैक
हृत्समये पूर्वं स्नात्वा हित्वा भारत मार्गपालीप्रबन्धीयान् गस्तम्भे च पादपे कुशकाशमयं दिव्यां तत्र वैकैर्व
बन्दनाद्यैः पूजयित्वा व्रतस्य समे नीराजने च तत्रैव कार्यं शुभप्रदं राजानो राजपुत्राश्च ब्राह्मणाः शूद्रजा
तयः मार्गपालीं समुल्लंघ्य नीरुजः सुखान्विताः तत्रैवादि स्वपुत्रान् कुशकाशमयीं कुर्याद्दिव्यं का
लिदनं तां मेकतोऽराजपुत्रीहि न वर्णसंस्थापयन्तः गृहीत्वा कर्षयेत् पुत्रो पश्चात् स्वांतं सहजं पुनः जयो त्र
न जाती न जयो राज्ञस्त्वं सर्वत्र तत्स्मिति अत्र विशेषो हि मार्गपालवलिप्रतिपद्दक्षत्रम् तस्माद्यतं प्रवर्तते मे भवत्रा

कृ॰ वि॰ तेन त्रमासनवैः तस्मिन्नवृते जयो वयसा तस्य संवत्सरं जपः पञ्चजपो विशतु ब्रह्मलक्षं नाम कस्मै भवेत् दयितानि
६३ ष्वस्मिहि तैर्नैवामासाच भवनेनिश्रेणि ॥ आदित्यपुत्रालेरो स्कंदस्य पुत्रा धृतं सहजेंसुमनोहरं कार्त्तिकेयस्वरूप
63 देवं प्रथमेनहनिसत्वकाकु जित्वा स्कंदाकारं स्वत्वे जयं लेभे च पार्वती ॥ तस्मैर्यं वाकसेः दुःखी कुमारान्सहितो
विवेति ॥ तत्राग्नि गोवर्द्धन पूजा गोपूजा प्रोक्ता गोवर्द्धनस्त्रो गोमये न कार्य स्त्रियेवा मंत्रस्तु गोवर्द्धन धराधा न६
र गोकुलत्राणकारक विष्णुबाहुकृतच्छाय गवां कोटिप्रदो भव ॥ गोपूजा मंत्रस्तु लक्ष्मीर्या लोकपाला
नां धेनुरूपेण संस्थिता घृतं वहति यज्ञार्थे मम पापं व्यपोहतु ॥ इति कार्त्तिकशुक्लप्रतिपदा कार्त्तिकशु
क्लद्वितीयायां यमद्वितीया ॥ सा च पित्र्यप्रियुता ग्राह्या तदभावे परा ॥ अपराह्णो यमस्य कालः तत्रैव पूजा विधा
नात् हेमाद्रौ स्कान्दे ऊर्जे शुक्लद्वितीयायां पूजितस्तर्पितो यमः वेष्टितः किंनरैर्हृष्टस्तस्मै यच्छति वांछितं यमलोकं न पश्यन्
ति भगिन्यौ कार्त्तिके शुक्लपक्षे सा द्वितीयायां तु धुंधिता यमो यमुनया पूर्वं भोजितः स्वगृहे सुपूजितः ॥ अ
तो यमद्वितीयेयं त्रिषु लोकेषु विश्रुता ॥ अस्यां निजगृहे विप्र न भोक्तव्यं ततो नरैः यत्नेन भगिनीहस्ता
१५ तं पुष्टिवर्द्धनं केतिचे ॥ पूर्व चैलार्पितां बहूनैर्नसा वैधम्मस्मात् पुत्रात् भ्रातुस्तथा पुः तथा यो राजन्नभवेत्तत्र कर्हिचित्
भगिन्यौ तौ सर्वा भगिन्यः संपूज्या अभावे प्रतिपन्निकाः प्रतिपन्ना भगिनी त्वेन ... सर्वाः कार्त्ति
कशुक्लनवमी युगादिः सा पौर्वाह्णिकी ग्राह्या पाद्मे कार्त्तिकशुक्लनवमी मया प्रोक्ता युगादिस्ते द्विजाः ॥ सुमति वि
धायसो व लोकेतु लक्षा सहितं विनं पूजयेद् विधिवद्भक्त्या व्रतोतत्र दिनत्रयं एवं यो कुरुते विधिना कुर्यात्
वाहिकं विधिमिति कार्त्तिकशुक्लैकादश्यां भीष्मपंचकव्रतं तदुक्तं नारदीये ॥ अतो नरैः प्रयत्नेन कर्त्तव्यं भी

६३

63A कार्यं पंचकं कार्त्तिकस्यामलेपक्षे स्नात्वा सम्यक् यतव्रतः । एकादश्यां तु गृह्णीयाद्व्रतं पंचदिनात्मकमिति पद्मे
पंचाहं पंचगव्याशी भीष्मायार्घं च पंचकं [illegible] सत्यव्रतापत्यं च वेदेषा
गोसायमहात्मने भीष्मायैतद्ददाम्यर्घं आजन्मब्रह्मचारिणे । वैयाघ्रपद्यगोत्राय सांकृत्यप्रवराय च । अ
६८ पुत्राय ददाम्येतदुदकं भीष्मवर्मणे इति । ततो विष्णुं गोमयेन स्नात्वा मौनेन वाग्यतः । पंचगव्येन विष्णुं स्ना सं८
प्य संपूज्य । पायसं नैवेद्यं दत्वा ओं नमो भगवते वासुदेवायेति द्वादशाक्षरमंत्रेणाष्टोत्तरशतं जप्त्वा ओं नमो विष्ण
वे इति षडक्षरेणाष्टोत्तरशतं [illegible] हुत्वा भूमौ स्वपेत् । एवं पंचदिनं विष्णुं [illegible] कुर्या
त् । विशेषस्तु । प्रथमेऽह्नि हरेः पादौ कमलैः संपूज्य गोमयं प्राशयेत् । द्वितीये बिल्वपत्रैः जानुनी संपूज्य गोमू
त्रं प्राशयेत् । तृतीयेऽह्नि [illegible] नाभिं पूजयेत् दुग्धं प्राशयेत् । चतुर्थे [illegible] करवीरैः स्कंधं संपूज्य दधि प्राशये
त् । [illegible] प्रतिमां [illegible] एवं [illegible] प्रायश्चित्तं [illegible] कृत्वा ध
[illegible] करवीरैः संपूज्य [illegible] जन्म [illegible] तत्सर्वं [illegible] पूजना
त् इति [illegible] प्रतिमां [illegible] विप्राय दत्वा [illegible] विप्रान् भोजयित्वा दक्षिणां दत्वा [illegible]
अवस्था [illegible] भुंजीतेति [illegible] देवो [illegible]
[illegible] चन्द्रिकायां [illegible]
कारक [illegible] जगत् [illegible]
[illegible] जगत [illegible] जगत् [illegible]
[illegible]

व्र.वि. मकेमाव इदं विष्णुरिति प्रोक्तेन मंत्रेण स्थापयेद्धरेरिति एवं देवमुत्थाप्य तद्दिने चातुर्मास्यव्रतसमाप्तिं कुर्यात्
६४ समाप्य सर्वं अप्रसन्नेतु मानेलोकः इदं व्रतं मया देव कृतं प्रीत्यै तव प्रभो न्यूनं संपूर्णतां यातु त्वत्प्रसादाज्ज
64 नार्दनेति तथा ब्राह्मे महात्मर्ये दैवैः रात्रौ प्राप्यमये तस्य दर्शने स्थिते उत्थिते देवदेवेशं ...पार्थिवः स्वयं चतुर्मा
सिकान्नियमान्विधिवत्समाप्य त्रैलोक्यपति ... ते श्रमास्तद्वत्सह... यस्य भक्त्या स्वनियमं
कृतं तद्वदं ... दत्वा ... कार्त्तिकशुक्लद्वादश्यां ... मासे च मन्वादि ... स्मात्सर्वेषु कीर्त्याहा
... व्रतं तेपा ... कार्त्तिकशुक्लचतुर्दशी
... कार्त्तिकस्य सितेपक्षे चतुर्दश्यां
... कार्त्तिकव्रतोद्यापनमुक्तं ... मलमासे
च वाऽदद्वाच ... व्रतिनः सम्यग्द्यापन विधिं ... विधानं समासतः ऊर्जशुक्ल
चतुर्दश्यां कुर्यादुद्यापनं व्रती व्रतसंपूर्णतार्थाय विष्णुप्रीत्यर्थमेव च ... पूजां कुर्यात्ततः शुद्धे
देशे ... तुलस्या ... चतुर्द्वारं ...
... तुलसीमूले देवानुसर्वतोभद्रमेव च पंचभिर्वर्णैः ...
... ताम्रपात्रेण विधि ... ताम्रपात्रे प्रकुर्वीत पल्लवैः ...
... कर्षमात्रसुवर्णेन प्रतिमां कारयेद्बुधः ...
... प्रतिमां स्थापयेद्द्विजः ...
... उपवीतिनी ... वस्त्राः ... प्रतिमा ... तथान्ये ६४

नैऋ

64A पंचकुंभान्स्व शक्त्या चैव स्थापयेत्सुधीः सौवर्णं राजतं ताम्रं मृन्मयं वापि शक्तितः त्रिंशत्पंचैव च पात्राणि नानाप
ल्लवयुतानि च कुंभोपरि कं तत्र स्थापयेद्विचक्षणः पूजां च कारयेत्तत्रैव क्षेत्रपालांश्च मंडले पूजयेद्बु
धो पंचगव्येन स्नापयित्वा देवस्य पूर्वतः ततः शुद्धोदकैः स्नापयित्वा विधानतः ततः पूजां पृथङ्मंत्रैः पुराणा
गमसंभवैः उपचारैः षोडशभिः कुर्याद्धोमादिकं ततः मंत्राः प्रयोगे द्रष्टव्याः एवं पूजां विधायैव पश्चाद्धोमं समा
चरेत् स्वगृह्योक्तविधानेन कृत्वाग्निस्थापनं ततः ग्रहमेतद्विधानेन होमं ग्रहपूर्वकं तिलाज्यपायसं मिश्रा
न्नेनानुपरि स्नुतान् विष्णुप्रकाशमंत्रेण रुद्रेणाष्टोत्तरं शतं स्माज्येन च हुनेद्देवं प्रायश्चित्तं ततो हुनेत् दुर्गाग
णेशक्षेत्रपालहोमं कुर्याद्यथाशक्तितः पूर्णाहुतिं ततो हुत्वा प्रणीतापात्रविसर्जनं ब्रह्मणे दक्षिणां दत्वा लोकपाल
बलिं ततः एवं कृत्वा विधानेन रात्रौ जागरणं चरेत् गीतनृत्यादिसंयुक्तं वाद्यैर्नानाविधैः सत्या गीतं कुर्वन्ति ये भक्त्या
जागरे चक्रपाणिनः जन्मांतरशतोद्भूतैस्ते मुच्यंते पापसंचयैः ततः प्रातः समभ्यर्च्य देवं स्नात्वा शुचिः पुनः आचा
र्यं पूजयेत्पश्चाद्वस्त्रालंकारभूषणैः [illegible] दत्वा सपत्नीकाय सोपधवे धेनुं सदक्षिणां दद्यादाचार्या
य पयस्विनीं देवस्य प्रतिमां दद्यात्सर्वोपस्करसंयुतां मोचयत्वं हि पापानि मनोवाक्कायजानि मे दामोदरस्य प
त्नीकः प्रीतो जन्मनि जन्मनि त्रिंशत्संख्यातास्तथा पंचकुंभाः पक्वान्नसंयुताः ब्राह्मणेभ्यः प्रदातव्याः केशवः प्रीयता
मिति [illegible] भ्यो विप्रवर्येभ्यो दद्याद्दक्षिणां प्रयत्नतः प्रयतः परया भक्त्या प्रदद्यादनुसारतः ततः सुवासिनीभ्यो दत्वा प्र
तीतवस्त्रं [illegible] भूषणं ब्राह्मणान्भोजयेत्पश्चात्स्वायसान्नादिना व्रती गुरुः व्रतोपदेष्टारं वस्त्रालंकारणादिभिः सपत्नी
कं समभ्यर्चितोऽपि विप्रान्समापयेत् पुण्यतमा [illegible] सर्वदा व्रतादस्मादपापं जन्मजन्मनि प

ध्र॰ वि॰

६५

65

स्नातं तत्सर्वं नाशमायातु स्त्रियामे वास्तु संततिः मनोरथाः सफलाः संतु नित्यं ममार्चनात् देहांते वैष्णवं स्थानं

प्राप्नुयामपि दुर्लभं इति तस्मा च्चिंतयित्वा विप्रान्नरस्यार्घ्यं च विसर्जयेत् ततो वै धूपदीपौ नैवेद्यतः परमानंद कार्त्ति-

केशाय तत्परास्मि विधिरेवं विधः स्मृतः इति मदनरत्ने पद्मपुराणे कार्त्तिकोद्यापनविधिः समाप्तः अथ प्रयोगः मयोक्तस्मकं लेद्

ला मध्यरात्रे उद्यापनं कृत्वा कार्त्तिकशुक्लचतुर्दश्यां प्रातः कृतनित्यक्रियः कुशाक्षतजलान्यादाय अद्येत्यादि जन्मजन्म

जन्मांतरकृतस्य सकलपापक्षयपूर्वकं श्रीराधादामोदरप्रीतिद्वारा देहांते वैष्णवपदप्राप्तिकामः कामनामुक

नामा नाम्नी वा अहं हृदयकाले कृतस्य कार्त्तिकस्नानदीपदानव्रतस्य सांगतासिद्ध्यर्थं उद्यापनं करिष्ये तदंगत्वेन ग-

णपतिगौर्यादिमातृकानवग्रहपूजनं कलशस्थापनं वरणं लक्ष्मीपूजनं राधादामोदरप्रतिमापूजनं च करिष्ये

इति संकल्पं कृत्वा गुरुवरणं चार्चनं कारयित्वा अद्येत्यादि अस्मिन्कार्त्तिकोद्यापनकर्मणि त्वमस्मद्ब्राह्मणादत्तपूगी-

फलतांबूलक एतिद्रव्येण मया वासोभिर्गर्भार्चित्वेन त्वामहं वृणे इत्याचार्यवरणं कुर्यात् ततस्त्वाचार्यो गणपत्या-

दिपूजनं कारयित्वा पूर्वतः क्रमेण मंडपद्वारेषु तुलसीमूले १ रुक्मिणीले २ जपं ३ विजयं च ४ द्वारपालं चतुष्टयं

पूजयित्वा मंडले देवतानावाहनपूजयेत् मध्यमे भोब्रह्मन्निहागच्छ इहतिष्ठ पूजां गृहाण वरदो भव स्वाहा

ॐ ब्रह्मणे नमः इति मंत्रेण गंधपुष्पाभ्यामर्चयेत् एवमग्रे आवाहनं पूजनं च कुर्यात् उत्तरे सोमं ईशाने ईशानं

पूर्वे इंद्रं आग्नेये अग्निं दक्षिणे यमं नैरृत्ये निरृतिं पश्चिमे वरुणं वायव्ये वायुं पूजयेत् वायव्यैशान्योः ते वसव

र्हनागाः एतेन इह तिष्ठत पूजां गृह्णीत वरदो भवत इति बहुवचनेन प्रयोगः एवमग्रेऽपि उत्तरेशानयोर्मध्ये

कामदेवाद्रा ईशानपूर्वयोर्मध्ये आदित्यान् पूर्वाग्नेययोर्मध्ये अश्विनौ विश्वेदेवान् इह तिष्ठतां पूजां

63A

गन्धूतितं वरदो भवतः इति द्विवचनेन प्रयोगः अग्निये दक्षिणयोर्मध्ये विश्वेदेवाः स्थापेत् कामूला गाधुतइतिम
तेन प्रयोगेणावाह्य स्थापेत् केभ्यो विश्वेभ्यो नमः इति पूजयेत् तथैव बहुवचनेन दक्षिणनैर्ऋत्ययोर्मध्ये सप्तपदा
न नैर्ऋत्यपश्चिमयोर्मध्ये सर्पान् पश्चिमवायव्ययोर्मध्ये गंधर्वाप्सरसः ततो मध्यमाच्च दलप्रजापत्या व
लसोमयोर्मध्ये रुद्रं ब्रह्मेशानयोर्मध्ये कुमारं ब्रह्मेन्द्रयोर्मध्ये स्कन्दिनं ब्रह्माग्न्योर्मध्ये दुर्गां ब्रह्मयमयोर्म
ध्ये विष्णुं तत्रैव स्वधां ब्रह्मनिर्ऋत्योर्मध्ये मृत्युरोगौ तत्रैव गणेशं ब्रह्मवरुणयोर्मध्ये आपः ब्रह्मयमयोर्मध्ये विष्णुं त
त्रैव ब्रह्मवामपार्श्वे गंगाद्याः सरितः ब्रह्मदक्षिणपार्श्वे सप्तसागरान् तत्र प्रथमपरिधौ सोमसमीपे गदां ईशान
स्य त्रिशूलं इंद्रस्य वज्रं अग्नेः शक्तिं यमस्य दंडं निर्ऋतेः खड्गं वरुणस्य पाशं वायोरंकुशं ततो मध्यमपरिधौ
उत्तरे गौतमं ईशाने भरद्वाजं पूर्वे विश्वामित्रं आग्नेये कश्यपं दक्षिणे जमदग्निं नैर्ऋत्ये वसिष्ठं पश्चिमे अ
त्रिं वायव्ये अरुंधतीं ततस्तृतीयपरिधौ पूर्वे ऐंद्रीं आग्नेये कौमारीं दक्षिणे ब्राह्मीं नैर्ऋत्ये वाराहीं पश्चिमे चामुं
डां वायव्ये वैष्णवीं उत्तरे माहेश्वरीं ईशाने वैनायकीं एवं मंडलदेवताः गंधपुष्पाभ्यां संपूज्य मंडलस्य कर्णिको
परि कलशस्थापनमंत्रेण कलशं स्थापयेद् परि षोडशपल मितं ताम्रपात्रं तंडुलपूर्णं [illegible] वस्त्रादियुतं स्थाप
येत् तस्योपरि जलपूरिताः सर्वे कुंभाः नानाफलयुतानि पात्राणि दक्षिणपार्श्वे सोपस्कराः शय्यां च स्थापये
त् ततो गन्धसुवर्णं कृत्वा राधादामोदरप्रतिमां स्नापनार्थपात्रं तत्रे वृत्तोपरि स्थापयेत् ततः पूजाप्रथा ॥
ॐ नमो भगवते वासुदेवायेति मूलमंत्रेण नमस्कृत्य राधादामोदररूपं दत्वा दामोदर समागच्छ स हृत्पद्मे जगत्पते

५८

६६ इमां मया कृतां पूजां गृहाण त्वं सुरसत्तम ॥ सहस्रशीर्षेति वा पठित्वा मोदामोदरसपत्नीक इहागच्छ इह तिष्ठेत्यावा-
66 हनं ॥ पद्मरागेति नानारत्नसमाकीर्णे कार्तस्वरभूषिते आसने देवदेवेश प्रीत्यर्थं प्रतिगृह्यतां पुरुषएवेदंसर्व
मिति च पठित्वा दामोदराय सपत्नीकाय आसनं समर्पयामीत्यासनं गंगादिसर्वतीर्थेभ्यो मया प्रार्थनया स्व
तं तोयमेतत्सुखस्पर्शं पाद्यार्थं प्रतिगृह्यतां एतावानस्येति चैतेन पाद्यं ॥ वरदत्वं वरदपुरुष प्रजापालन तत्पर नै४
नै५ नमो महात्म्य देवाय गृहाणार्घ्यं नमोस्तु ते ॥ त्रिपादूर्ध्व उदैत्पुरुष इत्यर्घ्यं ॥ कर्पूरवासितं तोयं मंदाकिन्याः समाहृतं
आचम्यतां जगन्नाथ मया दत्तं हि भक्तितः ॥ ततो विराडजायतेति आचमनीयं ॥ पयो दधि घृतं चैव माक्षिकं श
पा७ र्करं सह पंचामृतं मयानीतं स्नानार्थं प्रतिगृह्यतां ॥ पयः पृथिव्यामित्यादि पंचऋग्भिः पंचामृतस्नानं ततः
तत्त्वं कोविनकुंभस्थं गांगेयेनाहितं मया स्नानार्थं गृहाण त्वं तत्स्वितं स्नानं दामोदर जगत्पते ॥ तस्माद्यज्ञात्सर्वहुतः संभृत
मित्यनेन च शुद्धोदकस्नानं ततः प्रोक्षणप्रभृति मांकलप्रोपविष्टायावयेत् ततः वस्त्रयुग्मं सुविचित्रं सुवा
वैस्त६ सुदेवस्य वक्षम् लक्ष्म्या दामोदरो देवः प्रीयतां वाससः तस्माद्यज्ञात्सर्वहुतऋचः इति मंत्रेण वस्त्रयुग्मं यज्ञोप
वीतं सुवर्णं च मया दत्तं ततः दामोदर नमस्तेस्तु त्राहि मां भवसागरात् ब्रह्मसूत्रं चोत्तरीयं गृहाण पुरुषोत्तम तस्माद
श्वा अजायंत इति च यज्ञोपवीतं ततः चंदनेन सुगंधेन कर्पूरागुरुगंधिना लेपयेहं तवांगानि प्रीयतां मधुसू
दन तं यज्ञं बर्हिषि प्रोक्षन्निति च चंदनं माल्यादीनि सुगंधीनि मालत्यादीनि वै प्रभो मयाहृतानि पुष्पाणि पू
जार्थं प्रतिगृह्यतां ब्राह्मणोस्य मुखमासीदिति धूपः साज्यं च वर्तिसंयुक्तं वह्निना योजितं मया गृहाण मंगलं
दीपं त्रैलोक्यतिमिरापहं चंद्रमा मनसो जात इति इति च दीपं अन्नं चतुर्विधं स्वादु भक्तानां जीवनं परं नैवे

66A यं तेन यादृत्तं देवेभ्यः प्रतिगृह्यतां नाम्ना याः सीदिति वै वेद्यं तत आवमनीयं पातालतलसंभूतं वदतां मे
जम्भूवलं कस्तूर्यादिसमायुक्तं तांबूलं प्रतिगृह्यतां यस्तु भूवेलक्ष्मि वा इतिचतांबूलं पुंगफलं यथादेवस्या
पितेपुरस्तस्त्व तेन मे सफलावाप्तिर्भवेज्जन्मनिजन्मनि [illegible]
[illegible] ततो घंटेभ्यो नमः इति घंटान सोपस्करा पैत्र्यापयेत् नमइतिमन्त्रं तुलसीं च पूजयित्वा स्वस्ति
कं विधाय तेनाग्निं स्थापयित्वा ब्रह्मासनादि पर्युक्षणांतं कृत्वा ॐ प्रजापतये स्वाहा १ इंद्राय स्वाहा २ अग्न
ये स्वाहा ३ सोमाय स्वाहा ४ इति घृतेनाज्याहुतिचतुष्टयं कृत्वा तिलपायसेन घृतप्लुतेन वरतहोमं यथाशक्ति
कृत्वा इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य पांसुरे स्वाहा । प्रजापतये ... तन्त्रं कृत्वा दुर्गा
गणेशक्षेत्रपालहोमं च विधाय महाव्याहृत्यादि स्विष्टकृतांतं चाज्येन कृत्वा शीतवार्धौ घोषेण पूर्णाहुतिं
कृत्वा ब्रह्मणे पूर्णपात्रदानं प्रणीताविमोकः बर्हिर्होमः लोकपालेभ्यो बलिदानं कृत्वा दातोजागरणं कु
र्यात् ततः प्रभाते नित्यकर्मनादिकं कृत्वा चतुर्द्रव्यमेव पूर्णाहुत्यं तंत्रं पुनः प्रतिमां तुलसीं च संपूज्य
दामोदराय संभावयत्वविवाहापनीराजनं समर्पयामि चंद्रादित्यौ च धरणी विद्युदग्निस्तथैव च त्वमे
व सर्वज्योतींषि नीराजनं प्रतिगृह्यतामिति नीराजनं कुर्यात् ततः लोकात्मा सर्वभूतात्मा त्रिमे पद्मदसंभ
व जगन्नाथ जगद्धीश मम स्वामिन नमस्ते देवदेवेश नमस्ते धरणीधर नमस्ते विश्वरूपाय
नमस्ते पुरुषोत्तम यस्तु हे तुलसि च नमस्कारः ततः प्रदक्षिणा चतुष्टयं देवप्रपन्ने नमस्ये दासोहमि
ति तिमंत्र मत्वा प्रसीद पुरुषोत्तम पापोऽहं पापकर्माऽहं पापात्मा पापसंभव त्राहि मां पुंडरीकाक्ष प्रदक्षिण
पदे पदे सप्तम्यास्समधीधयमिति च प्रदक्षिणां कुर्यात् ततः मालतीमल्लिकापुष्पैर्गंधेयैः समन्वितं

स्कं॰ वि॰ पुष्पांजलिं गृहीत्वा पादौ वृजइत्याधिं तस्मिति पुष्पांजलिः ततः मंत्रहीनं क्रियाहीनं भक्तिहीनं च यद्भवेत् मयावं
६२ स्वत्प्रसादेन यदि पूर्णं तदस्तु मे नमस्ते देवदेवेश दामोदर सुरोत्तम [illegible] देहि प्रसन्नो दासोहं सर्वदा तवेति
67 प्रार्थना ततः पुष्पांजलिं क्षमापयित्वा [illegible] पापानीह कर्माणि मया कृतानि तानि [illegible] तेनाति मम दत्तसर्व
प्रणाम [illegible] पुनरागमनाय पठित्वा [illegible] विसर्जयेत् ततो ब्राह्मणान् ओं नमः विप्रान् संपूज्य प्र
दीपसमर्पण [illegible] कार्त्तिकस्नानदानव्रतस्योद्यापनविधौ इमान् सोपस्करान् घटान्
[illegible] दामोदरप्रीतये नानानामगोत्रेभ्यो ब्राह्मणेभ्यः ततः इमे [illegible] पात्रे [illegible] इमां सोपस्करां [illegible]
[illegible] देवतां [illegible] दामोदरप्रीतये नानानामगोत्रेभ्यः [illegible] दातुमहमुत्सृजे इति संक स्क॰ ७
ल्पं दद्यात् ततः कृतस्य कार्त्तिकोद्यापनस्य सांगतासिद्ध्यर्थमिमां धेनुं सोपस्करां रुद्रदैवतां तत्र कृष्णपीमंत
[illegible] यथाशक्ति [illegible] दातुमहमुत्सृजे ततो दामोदरप्रतिमां [illegible] आचार्या
ददात् तत्र मंत्रः [illegible] पापानि मनोवाक्कायजानि मे दामोदर सपत्नीक प्रीतो जन्मनि जन्म
नीति ततः [illegible] इमान् सोपस्करान् पंच घटान् नानानामगोत्रेभ्यो
[illegible] दातुमहमुत्सृजे इति पंचब्राह्मणेभ्यो दद्यात् ततः कृतस्य कार्त्तिकोद्यापनस्य साद्गुण्यार्थं त्रिंशत्संख्याका
ख ५ न् ब्राह्मणान् [illegible] भोजयिष्ये तद्भोजनसांगतासिद्ध्यर्थं यथाशक्ति दक्षिणां दास्ये इति संकल्पः ततो चरु
[illegible] संकल्पः ततः प्रार्थना [illegible] सर्वदा [illegible] जन्मजन्ममया कृतं
तत्सर्वं नाशमायातु स्थिरा मे चास्तु संततिः मनोरथाश्च सफलाः संतु नित्यं ममार्चनात् देहांते वैष्णवं स्थानं प्राप्नु

67A यामतिदुर्लभं इति सार्द्धं विप्रान् विसर्जयेत् इति कार्त्तिकोद्यापनप्रयोगः कार्त्तिकपौर्णमासी पराख्याता हे
मा प्रोक्ता तस्यां महाकार्त्तिकी स्यात् जीवे दौ कृत्तिकासु च यदा तु याम्यं भवति सर्वतस्या तिथौ क्वचित् तिथिः सा
पि महापुण्या मुनिभिः परिकीर्त्तिता प्राजापत्यं यदा ऋक्षं तिथौ तस्यां नराधिप सा महाकार्त्तिकी प्रोक्ता देवानामपि
दुर्लभेति पाद्मे विशाखासु यदा भानुः कृत्तिकासु च चन्द्रमाः स योगः पद्मको नाम पुष्करे त्वतिदुर्लभः पद्मकं पु ध४
ष्करे प्राप्य कपिलां यः प्रयच्छति स हित्वा सर्वपापानि विष्णोर्लभते पदं अस्यामेव सायंकाले मत्स्यावता
रः मात्स्ये कार्त्तिक्यां योग्य उत्सर्गं कृत्वा नक्तं समाचरेत् शैवं पदमवाप्नोति शिवव्रतमिदं स्मृतं तन्निमित्तं कृत्वा
तत्त्वार्णवे ब्रह्मपुराणे पौर्णमास्यां तु संप्राप्ते अमावास्यामथो दश सदा तस्मिंश्च हन्यते तेन कर्त्तव्यं नक्तभोज
नमिति इति मत्स्यादिः अस्यामेव सायंकाले त्रिपुरदाहोत्सवो भागीरथ्यां च दीपिकायां पौर्णमास्यां तु सं
ध्यायां कर्त्तव्यं त्रिपुरोत्सवः दद्याद्दीपं नेन मंत्रेण प्रदीपं सुरालये तत्र मंत्रः कीटाः पतंगा मशकाश्च वृ
क्षा जले स्थले ये विचरंति जीवाः दृष्ट्वा प्रदीपं न च जन्मभागिनो भवंति नित्यं श्वपचा हि विप्राः काशी
खंडे कार्त्तिक्यां कृत्तिकायोगे यः कुर्यात्स्वामिदर्शनं सप्तजन्म भवेद्विप्रो धनाढ्यो वेदपारगः इति दीपि
तमल्लिनामहृते श्रीनृपविलासे धर्मभोगाद्यौ कार्त्तिकमासः समाप्तः अथ मार्गशीर्षः भारते मार्गशीर्षे
तु यो मासमेकभक्तेन संक्षिपेत् भोजयेच्च द्विजान् भक्त्या स मुच्येद्व्याधिकिल्बिषैः कृषिभागी बहुधनो बहुधा
न्यश्च जायते मार्गशीर्षकृष्णाष्टमी कालाष्टमी सा प्रातर्व्यापिनी भैरवोत्पत्तेः प्रदोषकालीनत्वात् दि
नद्वये तद्व्याप्तावुत्तरैव अत्रोपवासादिकार्यं तदुक्तं काशीखंडे मार्गशीर्षासिताष्टम्यां कालभैरवसन्निधौ
कौ

व्र॰ वि॰

६८

68

उक्तो व्यंजनागारं कुर्यात्सर्वकार्येः प्रमुच्यते इति वृद्धिव्रतत्वात् वर्जते: रुद्रव्रते पुष्कर्त्रिका संमुहूर्तौ नस्य च इति व्रतस्यैव
तीक्ष्णं त्रिस्पृशली सेते कृत्वा तु विविधां पूजां महासंभार विस्तरैः नदीमार्गशीर्षे सिताष्टम्यां वार्षिकं विधिमुक्तं जे
त तीर्थकालोदके स्नात्वा कृत्वा तर्पणमस्त्वरः विलोक्य कालं राजानं विरूपाक्षं ... मार्गशीर्षशुक्ल
लोहस्तीर्थाय ... सौभाग्यकामनया मया कृतत्वात् इयं पूर्वविद्धा ग्राह्या मार्गशीर्षशुक्लपंचमी ना
गपंचमी सा च षष्ठीयुता ग्राह्या मार्गशुक्लषष्ठी चेत्पापषष्ठी चेत् सा परयुता ग्राह्या इयमेव स्कंदषष्ठी सा पूर्वयुता
ग्राह्या इयमेव चंपाषष्ठी ... चैव प्रमुच्यते ... मार्गमाद्यपदे शुक्लाषष्ठी वैधृति संयुता रविवारेण सं
युक्ता सा चंपेतीह कार्तिकेति मार्गशुक्लसप्तमी मित्रसप्तमी तत्र ... तत्वालिवे अदितेः कश्यपात्तज्जो मि
त्रो नाम दिवाकरः मार्गशीर्षस्य सप्तम्यां शुक्लायां पदेश्च मे तिथौ सप्तमी तेन सा ख्याता लोके ह्यस्मिन् मित्रसप्तमी
ते त्रोपवासः कर्तव्यो महद्याल्पफलानि वै मार्गशुक्लनवमी सा ... तत्रैव मार्गशीर्षशुक्ले ... पदे ...
नि पतः ... कृतोपवासो देवेशं समभ्यर्च्य जनार्दनं पंचगव्येन ... पंचगव्यकृतादानतः ...
तेषां ... भक्तितः ... देव ... जन्म ... व्रतं कृते म
गर्वं त्वत्प्रसादेन ... यथा ... जगत्सर्वं ... तथा ... व्रतादि मम
संतु वा इति मार्गशुक्लचतुर्दश्यां ... तत्र श्राद्धं त्रिस्पृशलीसेते ... श्री४
... पूर्वविद्धत्वात् ... ग्राह्या ...
विनो कुलधर्मव्रताद् ... मार्गशीर्षपौर्णमास्यां दत्तात्रेयोत्पत्तिः ... इति श्रीदिति...
... मार्गशीर्षमासः अथ पौषमासः ...

68A परेद्युर्विद्धत्वात्तिथिव नागपञ्चम्यनुष्ठानं पौषे देवानियतं तत्तत्र इति पौषादिमासत्रये कृष्णाष्टमी अष्टकाश्राद्धे तत्प
र नवमी अन्वष्टकाश्राद्धं तास्वेव मार्गकृष्णादित्रयो ग्राह्याः अथ च्छादनपर्यन्ते श्राद्धं पार्वणमपराह्णे वेत् इत्याश्वलाय
नेकाष्टकोक्तेः पार्वणं च श्राद्धं पराह्णकालत्वात् कौर्मे तु पौषादिमासत्रये षष्ठ्यामष्टम्यामष्टकाश्राद्धमुक्तं तच्छाखा
भेदेन व्यवस्थापनीयम् अष्टकैश्चाश्वलायनः अथ अन्नं हुत्वा पवसमाहरेद्दिनाम दानं पौषे शुद्धे न अन्वष्ट
कं यदा स्यात् पूर्वोक्तानि सर्वाणीति अन्वष्टकामाह हेमाद्रौ मण्डकापलं दत्तं मत्स्यमांसेऽष्टकाने भवति तदुक्तं का
ठकगृह्ये महालयाष्टकाश्राद्धे पाकमांसपिण्डमयेत स्वष्टमासविशेषात् विहितं वर्जयेन्मले इति मा
गादिषु विवाहेषु काम्यव्रतमुक्तं हेमाद्रौ तत्र भक्ष्या सर्वकामिनि संग्रहे पत्र त्रितयं तुलसी त्रिपलमय घृतं मा
सिकौ कांडिभक्ष मुष्टीनां त्रिस्तिलानां त्रिपल दधि तथा दुग्धकं गोमयं च त्रितयं तोयांजलीनां त्रिमारिचक
मव्योत्रिः पञ्चानां तत्र वः सुगोमूत्रं प्राकसासद्ध विधि इति विधिना भानुवारे क्रमेण मार्गशीर्षे प्रारंभः कार्त्ति
के समाप्तिरिति ज्ञेयं पौषशुक्लाष्टम्यां बुधयुक्तायां व्रतपूजनं पौषशुक्लैनवमी सावित्रकल्पादिः पौषशु
क्लेदशमी देवानकल्पादिः [illegible] पौषशुक्लैकादशी मन्वादिः सा पूर्वाह्नव्या
पिनी इति दीक्षितमतिरामकृते श्रीमदनूपविलासे धर्माम्भोधौ वत्सररत्ने पौषमासः अथ माघमासः
वामते माघे मासि तिलाः स्नातास्तिलधेनुप्रकामतः इंधनादयव्रतये चान्ये माधवप्रीणनाय चेति अ
घमाघस्नानं तत्र पौषशुक्लैकादशी माघ माघशुक्लैकादश्यां पौर्णमास्यां वा समापनमिति व्रतलघु
गले मकरसंक्रान्तिमारभ्य कुंभसंक्रान्तिपर्यावदिति विष्णुः कश्चित्तु पौषशुक्लपौर्णमासी मारभ्य माघशु

कृ॰वि
हरपौर्णमास्यां समापनमिति एवमनेकपक्षेपि· यस्मिन्मासे मकरस्थे सूर्ये संवत्सरोऽधिकः स एव पक्षो ग्राह्यः
९६ इति युक्तं यदा माघे मलमासे एव समापयेत् तदुक्तं दीपकार्यां लिखिता त्रिंशद्दिनात्मकमासमाश्रयस
69 मापयेत् मलिने मासोपवासव्रतमिति अयं निर्णयः सर्वत्र ज्ञेयः तत्र विधिर्विशिष्टनारदोक्तः तत्र चोद्यापय
नियमं गृहीत्वा यो विधिपूर्वकं माघमासमिमं पूर्णं स्नास्येऽहं देवमाधव तीर्थस्यास्य जले नित्यमिति संकल्प्य चे
श्रुप तसि ततः स्नात्वा शुभे तीर्थे दत्त्वार्घ्यं रवये द्विजः वेदोक्तविधिना नारायणार्घ्यं निवेदयेत् वस्त्रं कृत्वा विधानेन
तेन स्वैकद्वयोर्भवेत् भूशय्या ब्रह्मचर्यं च लोमाभ्यां स्नानं समाचरेत् अशक्तस्य धनाढ्यस्य स्वेच्छया सर्वत्र कल्पते
धनाढ्यस्य वस्त्रदानं कुर्वत इति प्रत्यहं स्नानमंत्रश्च पाठ्यः दुःखदारिद्र्यनाशाय श्रीविष्णोस्तोषणाय च प्रा
तःस्नानं करोम्यद्य माघे पापविनाशनं मकरस्थे रवौ माघे गोविंदाच्युत माधव स्नानेनानेन मे देव यथोक्त
फलदो भव इति मंत्रं समुच्चार्य स्नायान्मौनसमन्वित इति प्रत्यहं सूर्यार्घ्यमंत्रः पृथ्वीचंद्रोदये सवित्रे प्रसवित्रे
च परं धाम जले मे ओं दुरितसर्वं पापं त्वत्तेजसा परिभ्रष्टं इति भास्करे माघमासि रवौ स्नापः किंचिदभ्युदिते रवौ ब्र
ह्मघ्नं वा सुरापं वा कं पतंतं पुनीमहे इत्यादिनारदीयवचनात् ब्राह्मे वसन्तल्लोदयस्तूक्तः अरुणोदयमार
भ्य प्रातःकालावधिः प्रभो माघस्नानव्रतं कुर्यात्क्रमात् त्रावधो ऽरुणा उत्तमं तु सनक्षत्रे लुप्ततारं तु मध्यमं स
वितर्युदिते भूप ततो हीनं प्रकीर्तितमिति तेनात्र माघस्नाने यथापायत्वपायः तथापि तत्रैव तत्रा गेहेषु च वा स्नानात् कूपे भां
डस्थिते तथा माघमासे वरारोहे प्रासंगं वै निम्नगाजले भांडस्थिते तु विशेषः सहितोदमहावेगेऽनवकं भांस्थितं
तथा वाष्पताप्तितं ततो गंगास्नानसमं स्मृतं प्रभासखंडे माघे मासि तु यः स्नायादेकं तदर्धिलभावतः योऽशी
कफलं तस्य दिवसे दिवसे भवेत्तथा मासस्नानासंभवे त्र्यहमेकाहं वा प्रयागे स्नायात् अशक्तिन् योगे तथा क्लेपि
९६

स्नानाद् विंशदिनत्रयं प्रयागे माघमासे तु अहःस्नानस्य यत्फलं नाश्वमेधसहस्रेण तत्फलं लभते भुवि। स्नानादि पश्चात्
69A त्रयमकरसंक्रमः। इत्यादिक्रमेण माघः। इति दिनत्रयमित्येके। माघशुक्लत्रयोदश्यादीनीति वृद्धाः। तत्र नियमाः फल्गुनाऽ
दीव नवर्हिस्नेव चेतत्स्नातो विष्णुमानवे होमांश्चैव चैव हि स्नानार्थं न कदाचन। गृहस्थ हि निदग्धस्नाहिलिलाः
पार्कैरपाक्षिताः। त्रिभागस्तु तिलानां हि चतुर्थः पार्कैरपाक्षितः। एवं प्रातस्तु तपः। एवं स्नानमाचरेत् पदे पदेऽश्व
मेधस्य फलं प्राप्नोति मानवः। तिलस्नायी तिलोद्वर्ती तिलहोमी तिलोदकी तिलभुक् तिलदाता च षट्तिलाः पापना
शनाः। माघ्यां तैलविशेषोऽपि तत्रैव माघाघस्नानेषु भगो वटरसं भोजनं स्मृतं दंपतीः श्रमीमूले सत धान्यसमन्वि
ते त्रिंशत्तु मोदकादेयाः पार्करा तिलसंयुताः। अथैकादशीविधानेन व्रतोद्यापनं तदेति पद्मवचनात् सूर्यं कृत्य
तारं पूजनात्। दिनात्प्रधिवासनं कृत्वा पौष्कि तिलक्षीरे हेमकेतलपर्यां कृत्वा पवित्रे प्रपवित्रे चेति पूर्वोक्तमंत्रेण पटुत्वा
दिवाकर जगन्नाथ प्रभाकर नमोऽस्तु ते परिपूर्णं कुरुष्वेह माघस्नानमहाव्रतं इति च मापयेदिति संक्षेपः। विशेष
स्तु कार्तिकोद्यापनवत् सर्वं कुर्यात्। माघकृष्णसप्तमी प्रोक्ता कस्यादिः। माघकृष्णद्वादश्यां तिलद्वादशीव्रतं प्र
लपुराणे माघे तु कृष्णद्वादश्यां यमो हि मगणां तिलान् जुहुयात् दद्यात् तथा तपः कृत्वा हृदयं लोमिसुपक्रम्य ते
स्नामुवोक्तितः स्नानं तिलैस्तिलतर्पणं जेष्टं तिलतैलेन दीपश्च प्रदेयो देवगृहे च नैवेद्ये तिलान् वहोत अस्त्र
तिलास्तथा। तिलान्दत्वा च विप्रेभ्यो भक्तिपश्चात्तिलानपि। माघकृष्णचतुर्दश्यां यमतर्पणमुक्तं तथा च हेमाद्रौ प
मः। अरुणादित्ये काले माघकृष्णचतुर्दशी स्नातः संतर्प्य यमं सर्वपापैः प्रमुच्यते इति। माघ्यां मघायोगाव
श्यकत्वो मदनरत्ने महाभारते च। अमार्कपातश्रवणैर्युक्ता चेत्पुष्यमाघयोः। अर्धोदयः स विज्ञेयः कोटिसूर्य

सर

श्रा॰ वि॰ ग्रहैः समद्भुति पुष्पमाधवोर्मि धवनृत्तैर्गीतवीणावेणुनिःस्वनैः तथा तिलतिलपात्रं तेन अर्धमधिकं पठितं
१० दिवैव योगः प्राप्तोयं नतु मन्त्रोक्तदानं चेति स्कांदे अर्धोदये तु संप्राप्ते सर्वं गंगासमं जलं शुद्धात्मानो द्विजाः सर्वे भ
70 वेयुर्ब्रह्मसंमिताः यत्किंचित् क्रियते दानं तद्दानं मेरुसन्निभमिति तिलपात्रं तेस्कांदे च चतुःषष्टिपलैर्मुख्यममत्रं तत
त्र कारयेत् चत्वारिंशत्पलेनापि पंचविंशतिरेव वा अमत्रं पात्रं एतच्च कांस्यमयं एवं संपादितं कृत्वा कांस्यभाजन
मुत्तमस्य तु कृत्वाथ तथा निधाय पात्रं ततः तत्र पद्ममष्टदलं लिखेत् पद्मस्य कर्णिकायां तु कुंभमात्रं सुवर्णकं
तदभावे तदर्धं वा तदर्धं वापि कारयेत् शुभ्रैः सुतंडुलैः शुद्धैः कृत्वाष्टदलमुत्तमं तस्मात्रं स्थापयेत्तत्र ब्रह्मविष्णु
शिवात्मकं तेषां पूजा ततः कार्या विधिवत्तस्य सुगंधैर्मनैः वस्त्रादिभिरलंकृत्य ब्राह्मणाय निवेदयेत् दानमंत्रस्तु
सुवर्णपात्रसमात्रं पयस्वादितं तदूर्ध्वमसंयं प्रायशस्ताद्धकं पयस्थानं तत्तु हाटकं द्विजोत्तम सम्प्रकल्पेदयं रवेर्लापः पृथ्वी सम्यग्दातु
क्षीयसफलं तत्फलं लभते मर्त्यः कृत्वेदं दानमुत्तममिति मदनरत्ने स्कांदे विशेषः पूर्वाह्ने संगमे स्नात्वा शुचिर्भू
त्वा समाहितः सर्वपापविमुक्तश्च नियमस्थो भवेन्नरः त्रिदेवत्यमंत्रं तं देवाः कथितं भुक्तिमुक्तिदं भवेन्नरं विशौ
मेघत्रयो देवा ब्रह्मविष्णुमहेश्वराः इति नियममंत्रः ब्रह्मविष्णुमहेशानां सौवर्णपलसंख्यया प्रतिमास्तु प्रकर्तव्यास्तद
र्धं मध्यमा द्विजा स्वार्थं तत्र पात्रं भो द्रोणानां तिलपर्वतः शंभुर्मध्ये ब्रह्मा कर्तव्योऽपर्वतो विष्णुरुद्रयोः पूर्वसंस्थाप
यामात्रयं ततः कुर्यादुपस्करसमन्वितं ब्रह्मविष्णुशिवप्रीत्यै दातव्यं च गवां त्रयं एवं अन्यान्यादिदानं वि
भवसारतः मध्याह्ने तु नरः स्नात्वा शुचिर्भूत्वा समाहितः तिलपर्वतमध्यस्थं पूजयेद्देवतात्रयं तत्र ब्रह्मपूजा नमो वि
श्वसृजे तुभ्यं सत्याय परमात्मने देवाय देवपतये यज्ञानां पतये नमः ॐ ब्रह्मणे नमः ॐ पद्मजाय नमः पादौ पूजयामि
१०

70A एवं सर्वत्र कृहः हिरण्यगर्भाय नमः ऊरूभ्यां नमः परमेष्ठिने नमः जंघाभ्यां नमः वेधसे नमः गुह्ये पद्मोद्भवाय
नमः वस्तौ हंसवाहनाय नमः पूर्ववक्त्रे ऋग्वेदाय नमः दक्षिणवक्त्रे साम [illegible] वेदाय नमः पश्चिमवक्त्रे अथ
र्ववेदाय नमः उत्तरवक्त्रे चतुर्वक्त्राय नमः शिरसि एवं ब्रह्मपूजां कृत्वा प्रार्थनां कुर्यात् यथा हिरण्यगर्भ पुरुषप्र
धानाव्यक्तरूपक प्रसीद सुमुखो भूत्वा पूजां गृह्ण नमोस्तु ते इति ततो विष्णुपूजा यथा नारायण जगन्नाथ
नमस्ते गरुडध्वज पीतांबर नमस्तुभ्यं जनार्दन नमोस्तु ते अनंताय नमः पादौ विश्वरूपाय नमः ऊर्वोः मुकुंदाय जा
नुनी गोविंदाय नमः जंघे प्रद्युम्नाय नमः गुह्ये पद्मनाभाय नमः नाभौ लंबोदराय नमः उदरे कौस्तुभाय नमः वक्ष
सि चतुर्भुजाय बाहोः विश्वतोमुखाय वक्त्रे सहस्रशिरसे शिरसि मौलौ आदित्यचंद्रनयन त्रिविक्रमाहो दैत्यसूदन पूजां दत्तां म
या भक्त्या गृहाण करुणाकर इति प्रार्थना ततः शिवपूजा यथा महेश्वर महेशान नमस्ते त्रिपुरांतक जीमूतकेशाय
नमो नमस्ते वृषभध्वज ईशानाय नमः पादौ जंघयोरुग्रदेवरः जानुभ्यां माकांताय गुह्ये अनंताय नाभौ वै नीललोहितः
उदरे कृत्तिवाससे वक्षसे नागोपवीतिने योगरूपाय बाहू स्तु नीलकंठस्तु कंठके मुखे वै पंचवक्त्राय मौलौ चैव कपर्दिने
यथा अंधकारे प्रमेयात्मन्न सैलोकांतकाय च पूजां दत्तां मया भक्त्या गृहाण वृषभध्वज इति पूजां कृत्वा प्रार्थयेत्
इति पूजाक्रमः प्रोक्तो मंत्रैरेतैः प्रयत्नतः आचार्यं पूजयेद्भक्त्या वस्त्रालंकारभूषणैः श्वेतवस्त्रयुगं ब्रह्मणे [illegible]
[illegible] पीतवस्त्रद्वयं विष्णो लोहितं शंकरस्य च पंचामृतेन स्नापनं पूजनं कुसुमैः स्वकैः कमले तुलसीपत्रैर्बि
ल्वपत्रैः स्वं वदितैः तत्कालसंभवैर्दिव्यैः पूज्या देवा यथाक्रमं प्रजापतये विष्णुरूपाय रुद्राय नमः अनेन मंत्रेण स्वा
हांतं होमः गोदानं तेन दत्तं कृतं जप्तं मिथ्यात्वैः सहस्रधा कृतकृत्यो भवेद्विप्रः कृतस्नानस्य भावतः एवं मयाहमनाव्यो

शुक्ल २

अ.वि. तं दृष्ट्वा मंत्रमुत्तमं अर्धोदये यथा प्राह देवकिमन्यत्परिपृच्छसि इति स्कांदे तथा विष्णुधर्मोत्तरे इति अर्धोदयविधिः माघ तिथ
६८ कृष्णचतुर्थी तिलचतुर्थी सा प्रदोषव्यापिनी ग्राह्या माघचतुर्थ्यां तु नक्तव्रतपरायणाः ये त्वां ढुंढे च विधिवत् तेषां सु
71 ष्टस्तु ढुंढे विधायवरा विकीर्णां पात्रां चतुर्थ्यां प्राप्यतामसौ कृष्णपक्षे तिलान् च दत्वा प्राश्नीयाद्धुंढिकाव्रती तां यात्रां ना
रकः यः कुर्यात् तिलचतुर्थी ... उपसर्गसहस्रैस्तु सहतेनामसात्पया होमं तिलाज्यप्रमेलापनः कुर्यात् ततिभक्तितः तस्मा
च्चरः कुर्यात्... तिललड्डुकैः उपसर्गसहस्रैस्तु संहतो माघकृष्णचतुर्थ्यां तु कुंदपुष्पैः सदाशिवं संपूज्य योषितं ता
चतुर्थ्यां मंत्रहृत तस्यां मंत्रं प्रवेत्स्यतीति काशीखंडात् माघकृष्णचतुर्थ्यां तु वरमाराध्य च श्रियः पंचम्यां कुंद
ं प्राप्नोति श्रियं नरः माघशुक्ले पंचमी श्रीपंचमी वाग्देहे माघशुक्ले चतुर्थ्यां तु वरमाराध्य च श्रियः पंचम्यां कुंद
कुसुमैः पूजां कुर्यात् त्वरयैव पूर्वं माघवमते पूर्वा हेमाद्रिमते परा माघशुक्लसप्तमी रथसप्तमी सा अरुणोदयव्यापिनी
ग्राह्या तदुक्तं स्मृतिसंग्रहे सूर्यग्रहणतुल्या हि शुक्ला माघस्य सप्तमी अरुणोदयवेलायां तस्यां स्नानं तत्र महाफलं भवि
ष्योत्तरे माघे मासि सिते पक्षे सप्तमी कोटिभास्करा कुर्यात् स्नानार्घदानाभ्यामायुरारोग्यसंपदः इति अत्र स्नानमंत्र
ः सप्तमी स्यात् विसंज्ञा अत्र विधिः भविष्योत्तरे यदुक्तं धर्मं प्रति वसिष्ठवचः माघस्य सितसप्तम्यां सर्वकामफलप्रदं स्ना
नं सप्तम्यां निष्फलं जलं ... तैलवर्जितं दत्वा शिर
पसि भाजनजननं स्नानं कुरु वरानने कृत्वा वस्त्रमेकं भक्तं सप्तम्यां निष्फलं जलं ... ते वा सवर्णां वा तैलैर्वर्तिदानं तम्याम नर
सिद्धिदीपकं नैकेन चान्यतेषाव ज्ञाव तस्यानं समाचरेत् सौवर्णे राजते ताम्रे भक्त्या लाबुमये वा पुनः
लां राजनं ज्ञिता महाराजनं कुरुष्व संमाहितमनो भूत्वा दत्वा शिरसि दीपकं भास्करं हृदये ध्यात्वा इमं मंत्रमुदीर
येत् नमस्ते रुद्ररूपाय रसानां पतये नमः वरुणाय नमस्तेस्तु हरिवास नमोस्तु ते जलोपचित हृदि कोध्यात्वा संतर्पये

72A नसंहितायां माघकृष्णचतुर्दश्यामादिदेवो महानिशि शिवलिंगतयोद्भूतः कोटिसूर्यसमप्रभः तत्कालव्यापि
नी ग्राह्या शिवरात्रिव्रते तिथिरिति एवं सति पूर्वेद्युरेवोभयव्याप्तौ पूर्वैव उभयोर्दिनयोर्यदादिदिनमुक्तिप्रमाणतः जागरे शिव
रात्रिः स्यात्त्रिस्पृशा पूर्णा चतुर्दशी स्कांदोक्तेः दिनमुक्तिस्तु समयः दिनद्वये निशीथव्याप्तौ हेमाद्रिमते पूर्वा । उक्तं यत्रात्र
रा चेत्स्याज्जयायोगो यदा भवेत् पूर्वविद्धैव कर्तव्या शिवरात्रिः शिवप्रियैरिति वचनात् मदनरत्नेप्येवं परदिने प्रदोषव्याप्ति
स्प५ पीते भव व्याप्तिसत्त्वात्पूर्वैवेति माधवः पूर्वेद्युर्निशीथस्य परेद्युः प्रदोषस्यैकैकव्याप्तौ पूर्वैव जयायोगस्य प्राशस्त्या
त् तदुक्तं नारदसंहितायां माघफाल्गुनयोर्मध्ये असिता या चतुर्दशी अनंगेन समायुक्ता कर्तव्या सा सदा तिथिरिति कामे
ति ऽर्धरात्रात्पुरस्ताच्चेज्जयायोगो यदा भवेत् पूर्वविद्धैव कर्तव्या शिवरात्रिः शिवप्रियैरिति स्कांदे च भवेद्यत्र त्रयो
दश्यां भूतव्याप्ता महानिशा शिवरात्रिव्रतं तत्र कुर्याज्जागरणं तथा महतामपि पापानां दृष्ट्वा वै निष्कृतौ परा न
दृष्टा कुर्वतां भुक्तिं कुलवृद्धिं तिथिं शिवामिति स्कांदे दर्शयोगस्य निंदितत्वाच्च यदा चतुर्दशी पूर्वेद्युर्निशीथात्पूर्वं प्र
क्रान्ता परेद्युश्च निशीथादर्वागेव समाप्ता तदा परेद्युः कव्याप्तिसत्त्वात्पूर्वैव माधवाशिते भूतविद्धे न कर्तव्या अमुयेति योगं च
दिनं च दर्शं जयाप्रयुक्तां न तु जातु कुर्याच्छिवरात्रिं प्रियकृच्छिवस्येति वचनात् एवं दिनद्वये प्रदोषव्याप्त्यभावे निशी
थव्याप्तिसत्त्वात्पूर्वैवेति न दिनद्वये निशीथव्याप्तौ प्रदोषव्याप्त्या निर्णयः दिनद्वये प्रदोषव्याप्तौ निशीथव्याप्त्या निर्ण
यः एकैकव्याप्तौ तु निशीथेनेति सिद्धमिति स्कांदे माघकृष्णचतुर्दश्यां रविवारो यदा भवेत् भौमो वाथ भवेद्देवि क
र्तव्यं व्रतमुत्तमं शिवयोगस्य योगे च तद्भवेदुत्तमोत्तममिति निर्णयः शिवरात्रिपारणे तु विष्णुरुद्राव्याख्यानि दर्शयते स्कांदे

श्य॰ वि॰
१३
73
स्याष्टमी स्कन्दषष्ठी शिवरात्रिश्चतुर्दशी एताः पूर्वयुताः कार्याः तिथ्यन्ते पारणं भवेत् जन्माष्टमी रोहिणी च शिवरात्रि
स्तथैव च पूर्वविद्धैव कर्त्तव्या तिथिभान्ते च पारणमिति तिथिमध्ये विपारणं स्कान्दे कृष्णपक्षेऽष्टमी चैव चतुर्दशी
तु पारणं कुर्यात्तैः सुकृतलक्षैरप्यलभ्यते यावतां वा व्रतानां दर्शमध्ये तु या तिथीर्यान्ति शिवतिथि सम्यग्यान्ति भवेत्तासां
पारणं कृते तिथीनामेव सर्वासामुपवासव्रतादिषु तिथ्यन्ते पारणं कुर्याद्विना शिवचतुर्दशीमिति अत्र याममत्रयाद
र्वाक्चतुर्दशीसमाप्तौ तदन्ते पारणं तदूर्ध्वगामिन्यां तु प्रातस्तिथिमध्य एवेति हेमाद्रिमाधवादयो मन्वर्थस्यामाहुः ते
त्रियाममत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणं त्यादि सामान्यवचनेन स्कान्दवचनस्य सिद्धत्वमयुर्विधवाक्यैर्बाध्यस्य दुःप्रति
हत्वात् तिथिपति शिवेतु तिथ्यन्ते पारणं भवेदिति स्कन्दपुराण स्यादि विषयमेव नतु शिवरात्रि विषयं तदुद्योदाने तु पू
र्वयुतत्वमात्र कथनार्थं कथमन्यथा स्कान्दे एवमुक्तं स्युः हृदयवाक्यवत्तिथिमध्ये पारणाविधानं घटते तस्माद्दिनाद्वैव
चतुर्दशीमिति पर्युदस्तशिवरात्र्याः सर्वप्रकारेषु तिथिमध्य एव पारणेति मदनरत्नकालादर्शौ बोध्यौ सायाह्नस्त्र (उपवासद्ध)
पयवर्तमानविनीचेत्सरेहनि दिवैव पारणं कुर्यात्पारणं त्वैवदोषभागित्युक्तं इदं च व्रतं संयोगपृथक्त्वन्यायेन नित्यं काम्यं (मन्त्राय)
म्यं च तत्र स्कान्दे परात्परतरं नास्ति शिवरात्रिः परात्परं न पूजयति भक्त्येशं रुद्रं त्रिभुवनेश्वरं जन्तुर्जन्मसहस्रेषु भ्रम
ते नात्र संशय इति प्रकरणे प्रत्यवायश्रुतेः वर्षे वर्षे महादेवि नरो नारी पतिव्रता शिवरात्रौ महादेवं नित्यं भक्त्या प्रपूज
येदिति वीप्साश्रुतेः शिवलिङ्गेऽयं दिग्भावतः तीव्रते हिमवानपि चलेत्स्थेतेऽकदाचिद्वै निष्फलं हि शिवव्रत मिति वचना
च्च नित्यता तत्रैव शिवरात्रिव्रतं नाम सर्वपापप्रणाशनं आचाण्डालमनुष्याणां भुक्तिमुक्तिप्रदायकं द्वादशाब्दिकमे
तत्स्याद्व्रतं विंशाब्दिकं तु वैती श्रानं संहितायां तेन काम्यता अत्र जागरोपवासपूजा समुदिता व्रतं तत्र प्रत्येकं समुदि
१३

73A तानां फलसंबंधात् यत्तु ॥ अथवा शिवरात्रिं तु पूजा जागरणैर्नयेत् तथा ॥ अखंडितव्रतो यो हि शिवरात्रिमुपोषये
त् सर्वान्कामानवाप्नोति शिवेन सह मोदते तथा कश्चित्पुण्यविशेषेण व्रतहीनोपि यः पुमान् जागरं कु
रुते तत्र स रुद्रसमतां व्रजेदिति स्मृतिः स्कांदे तद्वाक्यविषयं माघे तत्र प्रतिमासशिवरात्रिस्तु शिवरात्रिशब्दस्य मा
घकृष्णचतुर्दश्यामेव रूढत्वात् दत्त्वायं निर्णयस्तत्रेति माघचतुर्दश्येव पूजाविधानाद्यस्मिन्दिनेऽधिकरात्रिमा
प्तिः साऽस्याः स्यात् सा ग्राह्या तत्पूर्वैव वेति हेमाद्रिः कृत्यविवाद वचस्तु तत्र प्रतिमासकृष्णचतुर्दश्यामपि शिवरात्रिग्राह्य
प्रयोगात् कौण्डपायनामयनाग्निहोत्रे ते ... त्यग्निहोत्रधर्मा इव तत्र धर्मप्राप्तिः स्यादेव ॥ अतः प्रदोषनिशीथोभयव्याप्तौ ह
प्रैव निर्णयः इति निर्णयसिंधौ मदनरत्ने चैवं ॥ अस्याः रम्भकालः स्कांदे ॥ आदौ मार्गशिरे मासि दीपोत्सवदि
ने शिवा गृहीयान्माघमासे वा द्वादशीं वत्सरोपवासयेत् तथा दीपोत्सवमध्यात्सम्भवकृष्णायां चतुर्दशी द्वादशाब्द २८
पिच्च मासेषु प्रकुर्यादिह जागरं ॥ अथ संक्षेपतः शिवरात्रिव्रतप्रकारो लिख्यते तत्र लिंगपुराणे बिल्वामलस्य त्रिपुंड्रे
ण विना रुद्राक्षमालया पूजितोपि महादेवो नस्यात्सर्वफलप्रदः तस्मान्मृदापि कर्तव्यं ललाटे तु त्रिपुंड्रकं कृ
तिरचनात् त्रिपुंड्रकरणं रुद्राक्षधारणं मालावपाकं प्रातःकृतनित्यक्रियः सूर्यः सोमो यमः कालः संध्ये भूतान्यहः क्षपा
पवनो दिक्पतिर्भूमिराकाशं खचरामराः ब्रह्मशासनमास्थाय कल्पयध्वमिह सन्निधिमिति मंत्रेण सूर्यादि
देवताभ्यो व्रतं निवेद्य ॥ ॐ ... त्वां वादिपूर्णतांब्रपात्रं गृहीत्वा तिप्पाद्युत्तरं कृत्वा शिवप्रीतिकामः ॥
शिवरात्रिव्रतं ह्येतत्करिष्येहं महाफलं निर्विघ्नमस्तु मे चात्र त्वत्प्रसादाज्जगत्पते चतुर्दश्यां निराहारो भूत्वा शं
भो परेहनि भोक्ष्येहं भुक्तिमुक्त्यर्थं शरणं मे भवेश्वरेति संकल्प्य च पुष्पं दत्वा जलमुत्सृजेत् ततो नित्यकृत्यं कृत्वा

व्र.वि. रात्रौ प्रथमप्रहरे । प्रयोगस्तु शिवरात्र्यां शिवपूजां करिष्ये इति संकल्पं कृत्वा पूर्वप्रतिष्ठिते लिंगे । अप्रतिष्ठिते तु नदेवप्राणप्र
७४ तिष्ठां कृत्वा वक्ष्यमाणपार्थिवलिंगपूजाप्रकारेण पंचामृतेन शिवमंत्रेण वैदिकेन पौराणिकेन नाममंत्रेण प्रणवादि
चतुर्थ्यंतेन मंत्रेण शिवनाम्ना वा षोडशोपचारैः पूजयेत् तत्र विशेषः ओं ह्रीं ईशानाय नमः इति प्रथमप्रहरे दुग्धेन स्ना
वा२ पनं शिवरात्रिव्रतं देवपूजाजपपरायणः करोमि विधिवद्दत्तं गृहाणार्घ्यं महेश्वर इति मंत्रेणार्घ्यदानं ततः शिवमंत्रजपे
74 न तत्कथाश्रवणादिना जागरणं कुर्यात् तथा पनेत तज्जपः स्नानेतत्कथाश्रवणादिकं उपवासकृता ह्येते गुणाः प्रो
क्ता मनीषिभिः इति शिववचनात् एवं प्रथमप्रहरे कृत्वा द्वितीयप्रहरे पूर्ववत्संकल्पं कृत्वा ओं ह्रीं अघोराय नमः इति मंत्रेण द
ध्ना स्नापनं नमः शिवाय शांताय सर्वपापहराय च शिवरात्रौ ददाम्यर्घ्यं प्रसीद उमया सह अनेनार्घ्यदानं कार्यं ततः तृ
तीयप्रहरे ओं ह्रीं वामदेवाय नमः इति मंत्रेणाज्येन स्नापनं दुःखदारिद्र्यशोकेन दग्धोहं पार्वतीपते शिवरात्रौ ददाम्य
र्घ्यं उमाकांत गृहाण मे इत्यर्घ्यदानं चतुर्थप्रहरे ओं ह्रीं सद्योजाताय नमः इति मधुना स्नापनं मया कृतान्यनेकानि
पापानि हर शंकर शिवरात्रौ ददाम्यर्घ्यमुमाकांत गृहाण मे इत्यर्घ्यदानं । प्रत्येकं प्रथमप्रहरवत्पूजावत् एवं पूजा
मूलाजपादिना प्रहरचतुष्टयं जागरणं कृत्वा प्रभाते व्रतसमर्पणं कुर्यात् यथा अविघ्नेन व्रतं देव त्वत्प्रसादान्म
या कृतं क्षमस्व जगतां नाथ त्रैलोक्याधिपते हर यन्मयाद्य कृतं पुण्यं तद्रुद्रस्य निवेदितं त्वत्प्रसादान्मया देव व्रतमद्य
समापितं प्रसन्नो भव मे श्रीमन् सद्गतिः प्रतिपद्यतां त्वदालोकनमात्रेण पवित्रोऽस्मि न संशयः इति मंत्रैर्व्रतसमर्पयेत् त
तः परदिने यथाशक्ति ब्राह्मणान्भोजयित्वा पारणं कुर्यात् यथा संसारक्लेशदग्धस्य व्रतेनानेन शंकर प्रसीद सुमु
खो नाथ ज्ञानदृष्टिप्रदो भव इति सर्वप्रार्थनां कृत्वा बंधुभिः सह पारणं कुर्यात् इति शिवरात्रिव्रतविधिः । अथैव प्रसंगात्सा

74A
पार्थिवलिंगपूजनविधिरुच्यते नंदिभविष्यके: आयुष्मान् बलवान् श्रीमान् पुत्रवान् धनवान् सुखी वरमिष्टं लभे
लिंगं पार्थिवं यः समर्चयेत् मृद्भस्मगोमयान् पिष्टं ताम्रकांस्यमयं तथा कृत्वा लिंगं सकृत् पूजयित्वा वसेत् कल्पायुतं दि
वि वाढेवितप्रदं लिंगं स्फाटिकं सर्वकामदं नर्मदागिरिजं श्रेष्ठमन्यद् विधिलिंगवत् कृत्वा पूजय विप्रेंद्र लक्ष्य
सर्वेप्सितं फलमिति देवीपुराणे मृदाहरणसंघट्टप्रतिष्ठाह्वानमेव च स्नापनं पूजनं चैव विसर्जनमतः परं हरो
महेश्वरश्चैव शूलपाणिः पिनाकधृक् शिवः पशुपतिश्चैव महादेव इति क्रमात् इति अत्र मृदाहरणादयः श्लो
कोक्ताः सप्तपदार्थाः क्रमेण प्रणवादिचतुर्थ्यंतैर्नमोंतैर्हरादिसप्तनामभिः पूजा कर्तव्या अत्रैव पदार्थाः पंचान्ते दले
वाप्येवं मंत्रेण कर्तव्याः ओं हिरण्यबाहवे वाले पुष्पोत्तानि निवेदने हेमेन नमः शिवायेति मंत्रः सर्वार्थफलदः स
र्वमंत्राधिकः कुष्माण्डमोक्षादिषद्वतः इति नंदिपुराणात् नाममंत्रेण वा पूजा कार्या तत्र पूजाक्रमो लिख्यते ओं ह
राय नमः इति मंत्रेण मृदमाहृत्य शोधयेत् ततः शोधनं कृत्वा तस्यां मृत्तिकायां शुद्धजलं प्रक्षिप्य ओं महेश्वराय नमः
इति मंत्रेण मृदं संघट्टयेत् तेन संघट्टितमृत्पिंडेन अंगुष्ठादि कनिष्ठिकापरिमितादहत्परिमाणं दधि कपरिमाणं
अंगुष्ठादूर्ध्वकोष्ठं च लिंगं कुर्यात् ततः ओं शूलपाणये नमः शिव इह सुप्रतिष्ठितो भव इति मंत्रेण सन्निधापयेत् त
तो ध्यानं कुर्यात् ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचंद्रावतंसं रत्नाकल्पोज्ज्वलांगं परशुमृगवराभीति
हस्तं प्रसन्नं पद्मासीनं समंतात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्ववीजं निखिलभयहरं पंचवक्त्रं
त्रिनेत्रं इति ध्यात्वा ओं पिनाकधृषे नमः इति मंत्रेण शुद्धोदकेन स्नापयेत् ततः आचमनीयादि वस्त्रमुपवी
त गंधपुष्पधूपदीपनैवेद्याचमनीयफलतांबूलदक्षिणानीराजननमस्काराः ओं नमः शिवायेति मंत्रेण कुर्या

प्र·वि·

७५

75

तस्मात्सर्वप्रयत्नेन कर्त्तव्यं तदा · शिवायतनमध्ये तु त्रिमंत्रेण पंचावरणं कुर्यात् ,प्रागमेव तु ; प्रागेवोंकारशिवस्याशेषमूर्त्तये पूः प्र वा

स्थाः तदुक्तं भविष्ये सर्वत्रैव शैवोपासकाश्चावस्थिताः पूर्वादिक्रमयोगतः ,पूर्वादिकांताः प्रपूज्यास्तु वेद्यां · लिंगं शिवं यजेद्विति

तत्र पूर्वादिपश्चिमोक्ता प्रागाद्या न तु पूज्य पूज · वोद्धं तं प्राचीनेति,प्रागाद्योक्ता प्रागाद्या न प्राचीमग्रतः न तु पूज्य पूजवोद्धं तं

प्राचीं त ,प्रागाग्रमेकोक्ता गत्वा प्राप्ता न प्राचीमग्रतः ध्यानमिति हृद्यामलेन निवेदयात् तत्पूजनं यथा ॐ शर्वाय क्षिति

मूर्त्तये नमः इति पूर्वस्यां ततः प्राच्यां ॐ भवाय जलमूर्त्तये नमः इति दक्षिणे ॐ रुद्रायाग्निमूर्त्तये नमः इत्युत्तरस्यां

ॐ उग्राय वायुमूर्त्तये नमः इति वायव्यां ॐ भीमायाकाशमूर्त्तये नमः इति पश्चिमायां ॐ पशुपतये यजमानमूर्त्ते

ये नमः इति नैर्ऋत्यां ॐ महादेवाय सोममूर्त्तये नमः इति दक्षिणस्यां ॐ ईशानाय सूर्यमूर्त्तये नमः इत्याग्नेय

यां पूजयेत् पूर्वोक्तदेवताः नैवेद्यं ततः स्तोत्रादिना स्तुत्वा जपः पुष्पांजलिः समर्प्य नमस्कृत्य · क्षमस्वेति प्र [illegible]

र्थी तु मंत्रैः प्रार्थयित्वा · ॐ महादेवाय नमः विसर्जयामि इति विसर्जयेत् इति पूजाप्रकारः भविष्ये स्कंदे च ·

धत्तूरकैस्तु यो लिंगं सकृत्संपूजयेन्नरः स गोलक्षफलं प्राप्य शिवलोके महीयते बिल्वपत्रैरखंडैश्च यो लि

गं पूजयेत्सकृत् सर्वपापविनिर्मुक्तः शिवलोके महीयते सर्वकामप्रदं बिल्वं दारिद्र्यस्य विनाशनं बिल्वप

त्रात्परं नास्ति येन तुष्यति शंकरः पुष्पाणामपि च पत्राणि श्रीवृक्षस्य सदैव हि इत्यादि वचनात् तत्र पुष्पाणि

बिल्वपत्राणि च शिवपूजायां प्रतिप्रशस्तानि पत्रं शिवाय समर्पितेषु पुष्पनैवेद्यादि तत्प्रसादरूपेण ग्राह्य विवे

कि न तत्त्वपंचोपयोज्यं स्यात् यदुक्तं निर्माल्यं ग्राह्यं तत्तु विधिरिति कालिकापुराणे दत्वा नैवेद्य वस्त्रा

दिकं दद्यात्किंचन त्यक्तं यच्छिवं समुद्दिश्य तद्दातेन तत्फलमिति भविष्ये च निषेधात् यत्तु ,प्रयत्नात्किंचिवै

७५

वेद्यं पत्रं पुष्पं फलं जलं स्नानं यथा मम कैलासं गात्सर्वपापैः पवित्रतामिति यति शिववचनं तस्मादर्थानुसमये
नं कुर्यात् पतनं दूजायां धालस्य रामस्य पितत्रसत्त्वान्नैवेद्यान्नदोषप्रतिपादकमिति शिवाः इति शिवरात्रिविधिः अ
थ पक्षसंख्यात शिवरात्रिव्रतोद्यापनविधिः तत्राहे माघे कृष्णे च यदा संजायते चित्ते भक्तिश्रद्धासमन्वितं स एव व्रतका
लः स्याद् घृतानित्यं हि जीवितं चतुर्दश्यां कर्तव्यं शिवरात्रिव्रतं शुभं एकभक्तं त्रयोदश्यां चतुर्दश्यामुपोषणं संपा
द्य सर्वसंभारान् मंडपं तत्र कारयेत् वस्त्रैः पुष्पैः समाच्छन्नं पद्मवर्णैर्विमोचितं तन्मध्ये लेखयेद्दिव्यं लिंगतोभद्रम
ण्डलं अथवा सर्वतोभद्रं मंडपांतः प्रकल्पयेत् शोभोपशोभासंयुक्तं दीपैः सर्वत्र समुज्वले आचार्यं वारयेत्तत्र ऋत्वि
ग्भिः सहितं शुचिः मंडपपश्चिमाले ऋत्विक्संयमाच शिवपूजाले मंडपस्तत्र कर्तव्यो होमस्तद्दशांशमितः सन्निधौ
नै८ मंडपस्याग्नेयां दिशि वापि कुण्डं मानं निमंत्र्य वेदविप्रप्रथममाचार्यं गतव्रतं द्वादशांगुलं ... सदाचारान् कुसं
युतान् पश्चिमे पूर्वप्रकं आमुकीद्दिक्षु पूजयेद्विधि पाद्यमाचमनीयं च मधुपर्कं च भक्तितः वस्त्राणि पादपाचार्यं
स्त्रालंकारदानादिभिरिति पुनः स्वयं शिवपूजां ... विप्रान् पूजयेद् तत्पुष्पकैः ... तैर्विप्रैः शिवपूजां स
मारभेत् शिवलिंगाजितान् ... विप्राशक्तितः कुंभान् स्थापयेद्दश ... मध्यपूर्वादिदिक्षु च पश्चाद्वेदि
स्थापनीयाः पूजनीयाः प्रयत्नतः मध्यकुंभे महेशं देवमुमया सहितं शिवं सौवर्णं प्रतिमां वा ...
तं शुभे पलेनवा तदर्द्धेन तदर्द्धेन वा कृतं अथवा द्वादशालिंगाख्यं कर्तव्यं ... मासैकं द्वादशाकैकं विधि मा
येकेन स्वशक्तितः वल्मीकतटतीर्थोत्थमृत्तिकाया ... उमामहेश्वरं देवं महीपीठे ... स्थापितं ततः ततः शो
दकस्नानं पंचगव्यस्नानं ततः भस्मस्नानं ततः कुर्यात्स्नानं स्तोत्रैरिति मंत्रतः पंचगव्यैस्ततः स्नानमाप्यायस्वेति पंच
भिः विविधैः ... अद्भिः सर्वौषधिसमन्विताः राजा ...

वधोऽस्त्विति मंत्रतः स्नापयेद्देवदेवेशं पंचामृतसमंत्रकं पयः पृथिव्यां पयसा दध्ना दधिक्राव्णो इति च घृतमिति घृतं म
धुवाता इति वै मधु सिताखंडं प्रकर्तव्यं स्वादुः पवस्वेति मंत्रतः ततश्शुद्धवारिणा तेन मंत्रेण नमस्ते रुद्र मंत्रतः ततः कुंभेषु तिलपूर्णे
ष्वपूर्णे वा ते सतंडुले सर्वौषधिसमायुक्ते पंचरत्नसमन्विते स्नापयेद्देवदेवेशं मृत्युमपापसहितं हरं ततः पूजा प्रकर्तव्या
षडंगन्यासपूर्विका आधारशक्तिं संपूज्य धर्माद्याः सितद्विकास्तथा अधर्माद्याश्च संपूज्या वामादिशक्तिपंचकं मूल
मंत्रेण संपूज्या नमस्ते रुद्र मंत्रतः शिवसंकल्प हृदयं पुरुषसूक्तेन वै शिरः शिखा त्वाशाष्टकं प्रोक्तं कवचं चाप्रति
रथं नेत्रं त्वाशिविभ्राडिति च यातरुद्रियमस्त्रकं चंदनैः कुसुमैश्चैव अक्षतैः सोपचारकर्दमैः पुष्पैः सुगंधैर्धूपैश्च धू
पैरसंभवैः नैवेद्यैर्विविधैश्चैव पायसाद्यैः फलैस्तथा नालिकेरादिभिर्दिव्यैर्हाटकोत्थसुवर्णाभनैः वस्त्राभ
रणान्येव प्रदद्याद्दक्षिणां तथा कुंभाः सर्वे प्रकर्तव्याः धान्यपुंजोपरि स्थिताः युग्मवस्त्रोपवीतेन संयुतास्फल
संयुताः भक्त्या स्तुत्वा नमस्कृत्य कुंभान् द्वादशाके ततः प्रतिलिंगं प्रतिष्ठाप्य पूजनीयं प्रयत्नतः पूर्वे लिंगे तथा कुं
भे तत्पुरुषं संपूजयेत्ततः द्वितीये पूर्वलिंगे तु कुंभे घोरं प्रपूजयेत् तृतीये लिंगकुंभे तु पूजयेच्च यथाक्रमं प्रथमे द
क्षिणे लिंगे रुद्रं कुंभे प्रपूजयेत् द्वितीये दक्षिणे लिंगे कुंभे घोरं प्रपूजयेत् तृतीये दक्षिणे लिंगे कुंभे रुद्रं प्रपूजये
त् पश्चिमे प्रथमे लिंगे भवं कुंभे प्रपूजयेत् द्वितीये पश्चिमे लिंगे सद्योजातं [illegible] घटे तथा तृतीये पश्चिमे लिंगे रु
द्रान्ते पूजयेद्धरं उत्तरे प्रथमे लिंगे भीमं कुंभे प्रपूजयेत् द्वितीये तूत्तरे लिंगे वामदेवं घटे तथा तृतीये तूत्तरे लिं
गे कालं कुंभे प्रपूजयेत् मध्यमे तु ततः कुंभे नामभिः शक्तिसंयुतैः संपूजयेद्देवदेवेशं मृत्युमपापसहितं शिवं एवं संपू
ज्य देवेशं भक्त्या सर्वोपचारतः ततो गृह्यविधानेन स्थापयित्वा विभावसुं स्थालीपाकः प्रकर्तव्यः पायसेनैव च

76A ततः लोकपालबलिं दद्यात् रात्रौ पूर्ववद्दिक्क्रमात् । पुराणस्तोत्रपाठैस्तु रात्रौ जागरणं चरेत् । प्रतिप्रहरमर्घ्यं च प्रम
हादेवाय भक्तितः । अर्घमंत्रान्प्रवक्ष्यामि । ततः प्रभातसमये कुर्यात् स्नानादिकाः क्रियाः । हवनं तु प्रकर्तव्यं पंचब्रह्म
मंत्रैर्यथोदितं विधिः शिवपुराणोक्तो लोकपालबलिं दत्वा बिल्ववृक्षसमुद्भवाः । समिधो होतव्या अष्टोत्तरशतं होतव्यं च त्रि
पंचकैः । पंचाशत्तु ततः प्रोक्ता प्रादेशमात्रप्रमाणाः ततः । आज्यस्याहुतयो देयाः समिद्भिः समितास्तथा तिलव्रीहिय
वैश्चैव पायसाज्येन भक्तितः । ततो नवग्रहमखः कर्तव्यश्च यथाविधि । प्रायश्चित्तं ततो हुत्वा पश्चात्पूर्णाहुतिं हु
नेत् । होमानंतरं कर्म तत्रैव । ततो देवस्य वै पूजा कर्तव्या व्रतकारकैः । स्नात्वा स्नानं प्रदातव्यं पाद्यं स्नानादिकं त
तः । सर्वं संपूजयेत् पादौ जानुनी गुह्यं तथा । ऊर्वोः पशुपतिं चैव कटिमुग्रं प्रपूजयेत् । अघोरं गुह्यदेवं भ्रू
कं चोग्रस्य पूजयेत् । भुजा शर्वं चैव वक्षः भवं संपूजयेत्ततः । सद्योजातं कंठदेशे ईशानं मस्तके प्रपूजयेत् । नासिकायां
महादेवं वामदेवं च चक्षुषोः । भीमं भ्रुवोश्च संपूज्य उमापतिं ललाटके । सर्वमापि नमः पूज्य सर्वदेहे महेश्वरं ।
ततो धूपादिदानेन पूजां कृत्वा यथाविधि । ततः स्वकुंभां मूर्तिं च सवस्त्रां वृषभे स्थापितां सर्वालंकारसहितां
माचार्याय निवेदयेत् । गां सवत्सां सवस्त्रां नानालंकारभूषितां [illegible] वस्त्रालिख्य [illegible] ।
था दद्यादाचार्याय [illegible] प्रीयतामिति । ततस्तु कुंभान्विप्रेभ्यो दद्यात् लिंगादिसंयुतान् । [illegible]
द्यात् [illegible] धान्यादिकं तथा । [illegible] दक्षिणामेव प्रदद्यात् [illegible] व्रतमेतन्मया [illegible] पूर्णं वा [illegible] सर्वं सं
पूर्णं तां यान्तु प्रसादात् व्रतं मम । इति संप्रार्थ्य तान्विप्रान् [illegible] पुनः पुनः । तिलपात्राणि देयानि [illegible] ब्रा
ह्मणेभ्यश्च चतुर्दश । ब्राह्मणेभ्यः स्वशक्त्या विशेषतः । ततः भोजनं मधुरं देयं पायसाद्यैः सुसंस्कृतैः । दक्षिणां च प्रद

तस्मात् मृत्तिकानं तथा पदं मंडपादि समग्रं गुरुः आचार्याय निवेदयेत् ततस्तु स्वजनैः सार्द्धं स्वयं भुंजीत सद्व्रती एवं यः कु
रुते देवि तस्य पुण्यफलं शृणु निर्मलो ह्यखिलैर्दोषैः भोगी स्यात् वर्षशतं भुवि पुत्रपौत्रसमायुक्तः सर्वकामसमन्वि
तः सं स्नानस्य फलं लभते तीर्थदानसमुद्भवं सर्वयज्ञसमुद्भूतं सर्वव्रतसमुद्भवं सर्वलोकेषु निखिलान्भोगान्भुंक्ते
पदं ध्रुवा ततः कृत्स्नं तस्मये मत्समीपे गत्वा लोमम स्थित्वा दिव्यं पलहा भोगान् चिरकालं भुनक्ति सः ततो मम सायुज्य
हेतो मद्देहे वलयं व्रजेत् एतद्धि उद्यापनं यस्मात् संक्षेपात् कीर्तितं विस्तरात् मद्भक्तायैकचित्ताय पाञ्चजन्यं देवतास्वपि गुप्त
तेजगाद व्रतस्य शिवरात्रिर नेन नाम्ना स्यात् तस्य वेविदधौ ति इह गत्वा उद्यापनं मद्दित्तं प्रविधत् तपापात् मुक्तिं च मुक्तिं मत्
लोकपुरवालभंते इति श्री दीक्षितनमल्लिरामकृतः शिवरात्रिव्रतोद्यापनविधिसंग्रहः ॥ प्रयोगः मंडपं क
दंके हस्तप्रपंचोक्तविधिना कारयित्वा त्रयोदश्यां शिवरात्रिव्रतोद्यापनांगत्वेनैकभक्तमहं करिष्ये इति संकल्प
पूर्वकमेकभक्तं विधिना एकभक्तं कुर्वीत ततश्चतुर्दश्यां प्रातर्नित्यं कृत्वा ओं अद्येत्यादि कालादिकीर्तनांते नि
र्व्याधिशरीरे लवर्षशतावधि पुत्रपौत्रधनादिसकलभोगभोगित्वोत्तरकल्पावधि समस्तदानफलव्रतस
मुद्भूतसर्वलोकभोगभोगानंतरचिरकालावधि शिवलोकप्राप्तिपूर्वकशिवसायुज्यप्राप्तिकामः शिव
रात्रिव्रतोद्यापनमंगत्वेन गणेशपूजनमहं करिष्ये इति संकल्प्य कृत्वा ॥ स्वस्तिमति गणेशं संपूज्य आचार्यसहिते स्वि
श्रीगणेशः पुण्याहवाचनविधिना पुण्याहवाचनं कारयित्वा दक्षिणादिना तान् संतोष्य विसर्जयेत् ततो मंड
पादाधिः पूर्वं स्थापितविधाय पाद्यार्घ्यालंकारवस्त्रैर्मधुपर्कपूर्वकं विधिवदाचार्यादीन्वृणुयात् तत्र शिवरात्रि
व्रतोद्यापनाख्ये कर्मण्येभिर्द्रव्यैः आचार्यत्वेन त्वामहं वृणे इति प्रयोगः आचार्यः ॥ ब्रह्मा ॥ ऋत्विजः ॥ एवं चतुर्द

77A ष्णानां वा रत्नं ततो मंडपं वितानादिभिरलंकृत्य । तदभावे द्वादशहस्तमितं चतुरस्रं भूभागं विलिप्य तस्योपरि विता
नं बध्वा तस्य मध्ये लिंगतोभद्रमथवा सर्वतोभद्रं विलिख्य तस्योपरि धान्यराशिं कृत्वा तदुपरि तंदुलपूर्णं सुवर्णा
दिकलशं स्थापयेत् ततः पूर्वादिदिक्षु द्वादश कलशाः स्थाप्याः यथा पूर्वस्यां दिशि कलशत्रयं जलपूर्णं
हितलसंख्यं दक्षिणे कलशत्रयं पश्चिमे संख्यं पश्चिमे तु दक्षिणसंख्यं उत्तरे पूर्वसंख्यानि तीर्थादिजलेन स्थापयेत्
कलशाः सर्वे धातुमयाः अथवा मध्ये धातुमयो शेषा मृन्मयाः तत्र स्थापनमंत्राः ॐ भूरसि भूमिरस्यदितिर
सि विश्वधाया विश्वस्य भुवनस्य धर्त्री पृथिवीं यच्छ पृथिवीं दृंह पृथिवीं मा हिंसीः इति भूमिस्पर्शनं ॐ आजि
घ्र कलशं मह्या त्वा विशंत्विंदवः पुनरूर्जा निवर्तस्व सा नः सहस्रं धुक्ष्वोरुधारा पयस्वती पुनर्मा विशताद्रयिरि
ति कलशस्थापनमंत्रः यथोक्तस्थानेषु धान्योपरि स्थापयेत् वरुणस्योत्तंभनमसि वरुणस्य स्कंभसर्जनी स्थो वरु
म९ णस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमासीदेति मंत्रेण तावद्भिः पूरयेत् ॐ हृताधिवा
हेलकृचौनस्नानं वायुना नमस्ते सर्वभूतानां प्रभवारत्निहव्रते इति तेषु सप्तवराहेलमूलमिति निक्षिपेत् ॐ ओषध
यः समवदंत सोमेन सह राज्ञा यस्मै कृणोति ब्राह्मणस्तं राजन्पारयामसीति सप्तधान्यानि निःक्षिपेत् ॐ अश्वत्थे वो
निषदनं पर्णे वो वसतिष्कृता गोभाज इत्किलासथ यत्सनवथ पूरुषमिति पंचपल्लवान् याः फलिनीर्या अ
फला अपुष्पा याश्च पुष्पिणीः बृहस्पतिप्रसूतास्ता नो मुंचंत्वंहसः इति पूगीफलानि हिरण्यगर्भः समवर्त
ताग्रे भूतस्य जातः पतिरेक आसीत् स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेमेति पंचरत्नानि य
ज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् आयुष्यमग्र्यं प्रतिमुंच शुभ्रं यज्ञोपवीतं बलमस्तु तेजः इति य
ज्ञोपवीतं कलशानां कंठे वेष्टयेत् ततो गंधपुष्पाक्षतैः स्नानमर्चा ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे ध्रु

प्र॰ वि॰ ७८

वं विश्वमिदं जगत् ध्रुवो राजा विशामयं ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवं
ध्रुवेणा हविषाभिसोमं मृशामसि अथो न इन्द्रः केवलीर्विशो बलिहृतस्करत् इति त्वनेनाभिमंत्र्य पुनर्वाहनवासाः परि
वीतः प्राणानायम्य चैत्यां भवति नाम मन्त्रैः तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः इति वस्त्रयुग्मेनाच्छा
द्य तेषामुपरि लिंगप्रतिमास्थापनार्थं ताम्रादिपात्राणि स्थापयेत् अथ द्वादश लिंगानि सौवर्णानि उमामहेश्व
र प्रतिमा सुवर्णरजतामयतद्रूपमस्याचैकस्मिं ताम्रपात्रे स्थापयित्वा, आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन
महे रणाय चक्षसे इत्यनेन स्नापयित्वा। यदि नो हृदस्पृहे तिष्ठ लकुपति त्वेवमस्य दुर्मतिरघायोः अथ वसिष्ठ नामयव
क्षस्तनुषु वसीमहि लोकाय तत्तनयाय मृड पाहि मृत्योर्मुक्षीय मामृतादिति लिंगप्रतिमयोः स्नानमनेन तन्मन्त्रेण कृत्वा अ
ग्न आयूंषि पवसे आसुवोर्जमिषं च नः आरे बाधस्व दुच्छुनां वनस्पतिः प्रधिसंमतं पयः तान्द्रयुम्नं उधन्नमहतः सपूर्वं स्नानं
गन्धं स्नेहं इत्यनेन वियम् ऊर्जं प्रतिमा स्नेतेषु गन्धद्वारां अवितमृत्त्वा यामीति स्नापयित्वा मृत्तिकया स्नानं कुर्यात् ततो महीद्यौः
पृथिवी च न इमं यज्ञं मिमिक्षतां पिपृतां नो भरीमभिरिति सप्तमृत्तिकाचूर्णैर्विलिप्य स्नापयित्वा मानस्तोके तन
ये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः मा नो वीरान् रुद्र भामितो वधीर्हविष्मन्तः सदमित्त्वा हवामहे
इति भस्मना स्नानं कारयित्वा पंचनद्यः सरस्वतीमपियन्ति सस्रोतसः सरस्वती तु पंचधा सो देशेऽभवत्सरिदिति
तीर्थोदकैः स्नापयेत् ततः प्राणप्रतिष्ठां कुर्यात् यथा शिवस्य प्राण इह प्राणाः शिवस्य जीव इह स्थितः शिवं सर्वे स्मा
न्द्रियाणि वाङ्मनस्त्वक्चक्षुः श्रोत्रनिघ्राणजिह्वा वाजास्य सुखं चिरं तिष्ठन्तु स्वाहेति पठित्वाऽभिमन्त्रणं कुर्यात् ततोऽस
न्मेऽस्त्वाप्यायतां वाक्त आप्यायतां प्राणस्त आप्यायतां चक्षुस्त आप्यायतां श्रोत्रं त आप्यायतां वाक्त आप्या
यतां निष्प्याययतां तेजोऽस्तु वाममहोऽस्मः इति जपेत् इति प्राणप्रतिष्ठां कृत्वा दिगमिसिंहासनाद्र्द्रुं प्रभामण्डलमंकिते
७८

78A त्रिनेत्रं जटाजूटं चंद्रार्द्धकृतशेखरं भुजंगस्फारकं संकाशं नागयज्ञोपवीतिनं वसानं चर्म वैयाघ्रं वामे वस्त्रमयापु
तं त्रिनेत्रं च चतुर्बाहुं प्रसन्नवदनांबुजमिति ध्यानं कुर्यात् । आगच्छ देव देवेश मंत्रैर्लोकहितेच्छया पूजयामि विधि
नेन प्रसन्नः सुमुखो भव । आवाहनं ॥ स्थिरासनं महादेव कृतं रत्नैः सुशोभितं ब्रह्मणा निर्मितं पूर्वमासनं कल्पयाम्यहं
मिति पुष्पं वेदयेत् आसनं ॥ सदासनं कुरु प्राज्ञ निर्मलस्वर्णनिर्मितं भूषितं विविधै रत्नैः कृतं कल्पितमासनमिति पा
दप्यापनार्थमासनदानं ततः ॐ कायनमः इति पाद्यं गंधोदकेन पुष्पेण नारिकेलेन समन्वितं । अर्घं गृहाण देवेश ल५
भक्तिं मे सफलां कुरु इत्यर्घदानं ततः पाजोदधीः पूर्वजा तादेवेभ्यश्चिपुरंजुषा मंत्रेणाचमनं महपुष्पं यातेधामा
नि सत्वेति सर्वौषधिस्नानं पने ततः पंचगव्यस्नानं यथा गायत्र्या गोमूत्रेण गंधद्वारां दुराधर्षां नित्यपुष्टां
करीषिणीं ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियमिति गोमयेन । आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यं भवा
वाजस्य संगथे इति दुग्धेन दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः सुरभिनो मुखाकरत्प्रण आयूंषि तारि
षत् इति दध्ना तेजोसि शुक्रमस्यमृतमसि धामनामासि प्रियं देवानामनाधृष्टं देवयजनमसि इति घृतेन ततः
पंचामृतस्नानं यथा पयः पृथिव्यां पय ओषधीषु पयो दिव्यंतरिक्षे पयोधाः पयस्वतीः प्रदिशः संतु मह्यमिति दुग्धे
न दधिक्राव्णो इति दध्ना घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतं वस्य धामा । अनुष्वधमावह मादयस्व स्वाहा
कृतं वृषभ वक्षि हव्यमिति घृतेन मधुवाता ऋतायते इति मधुना स्वादुः पवस्व दिव्याय जन्मने स्वादुरिंद्राय सुह
वीतु नाम्ने स्वादुर्मित्राय वरुणाय वायवे बृहस्पतये मधुमाँ अदाभ्यः इति शर्करया ततो नमस्ते रुद्र मन्यव उतो त इ
दिमिदमिवे कं कुर्यात् ततः कुंभोपरि स्थापितताम्रादिपात्रे ब्रह्मणामेकं विधिना पीठपूजां कृत्वा लिंगतोभद्र पदि
स्थापित कुंभोपरि पात्रे । दवाष्टं ताम्रमहेश्वरप्रतिमां स्थापयित्वा पूर्वादिदिक्षु स्थापनक्रमेण द्वादशलिंगानां

प्र॰ वि॰ स्नापनं कुर्वीत स्कंदोपेतं गंधास्यं संस्कृत्वा पूजां कुर्वीत सांगोपांगाय पञ्चामृत इति षडुद्दिष्टाय नमः सहस्रशीर्षेति
७६ षोडशर्चाभिः शिरः हिताहा नाथाय बलेः शिखायै वषट् ऋग्भिः शिखान इति द्वादशाभिः कवचाय हुं विभ्राडिति च
79 तुर्दशाभिः नेत्रत्रयाय वौषट् नमस्ते इति षोडशाभिः अस्त्राय फट् एवं न्यासं कृत्वा वह्निसंस्थं सूत्रं च देवानामपि
दुर्लभं गृहाण त्वमुमाकांत प्रसन्नो भव सर्वदेति प्रत्येकं वस्त्रदाने यज्ञोपवीतं सहजं ब्रह्मसूत्रविनिर्मितं पुरा ऋग्
यजुःसामवेदैः स्पृष्टं पवीतं गृहाण मे इत्युपवीतं ततः शिवाय नमः इत्याचमनीयं मलं कटकं च मलयाद्रिसमु
द्भूतं सुगंधिद्रव्यसंयुतं गृहाण त्वं महादेव भुक्तिमुक्तिफलप्रदेति गंधः अक्षतान् धवलान् काश्मीरक्षालितं
दुलैः समन्वितान् गृहाण त्वं महादेव प्रसन्नो भव सर्वदेति अक्षतान् नानाविधानि पुष्पाणि सुगंधानि मया विभो
पूजार्थं ते विधेयानि गृहाण परमेश्वरेति पुष्पाणि कूष्मांडं द्राक्षापुष्पाणि समानीतानि ते विभो गृहाण त्वं महा
देव प्रसन्नो भव सर्वदेति दशविधं पुष्पसहितं कूष्मांडं तदभावे नारिकेलं वा समर्पयेत् एवं सर्वत्र सामान्यपूजां
कुर्वीत यथा पूर्वं दिक्क्रमेण लिंगे ॐ शर्वाय नमः द्वितीये अघोराय नमः तृतीये रुद्राय नमः इति पश्चिमे प्र
थमे ॐ भवाय नमः द्वितीये सद्योजाताय नमः तृतीये ईशानाय नमः इति उत्तरे प्रथमे भीमाय नमः द्वितीये वा
मदेवाय नमः तृतीये कालाय नमः इति नामपूजां प्रतीतैः कृत्वा मध्ये कलशे नामपूजामष्टाभिः कुर्वीत यथा ॐ
पू॰ ४ शिवाय वह्निसहिताय उग्राय पृथ्वीसहिताय रुद्राय भस्मसहिताय पशुपतये भवं कश्मीरादिस
हिताय भीमाय मोहिनीप्राक्सहिताय ईशानाय नमः कुमुदाप्राक्सहिताय महादेवाय हरिप्रियादिसहिता
य हराय विद्याप्राक्सहिताय पञ्चाननाय नमः इति ततो दशांगं गुग्गुलं धूपं गंधं च मनोहरं मयादत्तं महा
देव गृहाण परमेश्वरेति धूपः इमं दीपं महादेव तमोनाशकरं परं गृहाण पार्वतीनाथ देवदेव नमोस्तु ते इति दीपः
७६

सू॰१ नैवेद्यं गृह्यतां देव भक्ष्यभोज्यसमन्वितं । नानाद्रव्यसमायुक्तं प्रसन्नो भव सर्वदा ॥ इति नैवेद्यं ततः शिवाय नमः इत्याचम
79A नीयं । पूगीफलैः सकर्पूरैर्नागवल्लीदलैर्युतं । भक्त्या दत्तं मया देव ताम्बूलं प्रतिगृह्यतां । इति ताम्बूलं । इदं नीलसमायु
सू॰२ क्तं जीवदं पद्मसंस्थितं । सौवर्णं तु महादेव गृह्यतां परमेश्वर ॥ इति यथाशक्ति सुवर्णपुष्पाणि । नानाफलानि दिव्यानि स्वादूनि
स्व॰४ धानि निर्मितानि मे । गृहाण त्वं महादेव भक्तिमे सफलं कुरु ॥ इति फलानि ततो नीराजनं पुष्पाञ्जलिः क्षमापनं प्रदक्षिणा
करणं दंडवत्प्रणामः एवं पूजां कृत्वा रात्रौ मंडपाद्बहिः पश्चिमदिशि कुंडे स्थंडिले वा गृह्योक्तविधिना अग्निं स्थाप्य पा सं॰५
युसंस्कृत्वा लोकपालेभ्यो बलिं दद्यात् तत्र इंद्राय नमः बलिं समर्पयामि इत्यादि चतुर्थ्यंतनामभिर्लोकपालानां नाम
मंत्रैः पूर्वादिदिक्षु कुर्यात् ततः पुराणस्तोत्रपठनश्रवणलोकप्राप्तबलगीतवाद्यैर्जागरणं कुर्यात् तत्र प्रहरे प्रहरेऽर्घ्य
दानं कर्तव्यं यथा मया कृतान्यनेककालिकानि पापानि शंकर गृहाणार्घ्यमुमाकांत शिवरात्रौ प्रसीद मे इति प्रथम
ती॰७ प्रहरे दुःखदारिद्र्यशोकेन दग्धोऽहं पार्वतीपते गृहाणार्घ्यं दयां कृत्वा शिवरात्रौ शिवाय ते इति द्वितीयप्रहरे शिवरात्रौ
ददाम्यर्घ्यं सर्वपापक्षयोऽस्तु मे शिवः श्रीमान्तु मे भक्त्या प्रसन्नोऽस्तु मया सह इति तृतीयप्रहरे ओमक्केशान नमस्तुभ्यं गौ
मालन नमस्तु पिले नवतत्रू पिलिङ्गतुभ्यं गृहाणार्घ्यं नमोऽस्तु ते इति चतुर्थप्रहरे ततः प्रातः स्नानादि नित्यं कृत्वा त अ॰६
अ॰५ क्षिन्नेवाज्येन प्रजापतये स्वाहा इदं प्रजापतये न मम इंद्राय स्वाहा इदमिंद्राय न मम अग्नये स्वाहा इदमग्नये न मम
सोमाय स्वाहा इदं सोमाय भूः स्वाहा इदमग्नये न मम भुवः स्वाहा इदं वायवे न मम स्वः स्वाहा इदं सूर्याय न मम इ
ति समस्तं कृत्वा घृतेन हुत्वा त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनं उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात् इ
ति मंत्रेण होतव्यानि विल्ववृक्षसमुद्भवाः प्रभावे पालाशाः पंचामृतप्लुताः प्राचार्ये पल होतव्याः अष्टोत्तरशतं

प्र॰वि॰

८०

80

तेनैव मंत्रेण तिलव्रीहियव पायसाज्यतोऽन्यद्रव्येण समिल्लवे पश्चमये होमः कार्यः ततो यथाशक्ति नवग्रहाणां होमः
स्वस्ववैदिकमंत्रैः एवं होमं कृत्वा पुनराचार्यो घृतेन त्वन्नो अग्ने वरुणस्य विद्वान् देवस्य हेडो अवयासिसीष्ठाः यजि
ष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत् स्वाहा इदमग्नये न मम स त्वन्नो अग्नेऽवमो भवोती नेदिष्ठो
अस्या उषसो व्युष्टौ अवयक्ष्व नो वरुणं रराणो वीहि मृडीकं सुहवो न एधि स्वाहा इदमग्नये न मम अयाश्चा
ग्नेस्यनभिशस्तिपाश्च सत्यमित्त्वमया असि अयानो यज्ञं वहास्ययानो धेहि भेषजं स्वाहा इदमग्नये अयसे नम॰ ये
ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुंचंतु मरुतः स्वर्काः स्वाहा इदं
वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यो न मम प्रजापतये स्वाहा इदं प्रजापतये न मम इति व
रुणाहुतीर्हुत्वा॰ तिलादिहोमद्रव्येणाग्नये स्विष्टकृते स्वाहा॰ इदमग्नये स्विष्टकृते न ममेति स्विष्टकृद्धोमं कृत्वा
पूर्णाहुतिं कुर्यात् ततो ब्रह्मणे पूर्णपात्रदानं प्रणीताविमोकः बर्हिर्होमः एवं होमं समाप्य पुनः षोडशोपचारेण आसनादिभिं
पाद्यादीनां तांबूलांतं कृत्वा अंगपूजां कुर्यात् यथा भवाय नमः पादौ पूजयामि शर्वाय नमः जानुनी पशुपतये नमः
ऊर्वोः पूज॰ उग्राय नमः कटिं अघोराय नमः गुह्यं पू॰ रुद्राय नमः हृदयं पू॰ हराय नमः भुजौ पूज॰ सद्योजाताय नमः
कंठं पूज॰ ईशानाय नमः मुखं पूज॰ महादेवाय नमः नासिके पूज॰ वामदेवाय नमः चक्षुषी पूज॰ भीमाय नमः श्रोत्रे
पूज॰ उमापतये नमः ललाटं पू॰ महेश्वराय नमः सर्वांगं पूजयामीत्यंगपूजां विधाय धूपादिप्रदक्षिणांतं कृत्वा पुष्पां
जलिं कुर्यात् ततो मध्यकुंभसहितां सोपस्करां इमां महेश्वरप्रतिमां शंभो प्रसीद देवेश सर्वलोकेश्वर प्रभो तवरूपप्र
दानेन मम संतु मनोरथाः इति मंत्रेणाचार्याय दद्यात् ततः शिवरात्रिव्रतोद्यापनसांगतासिद्ध्यर्थं सवत्सां गां सालंकारां

गामस्वाम्याय दत्वा सोपस्करं च शय्यां दद्यात् ततो द्वादशब्राह्मणेभ्यो द्वादशलिंगानि सोपस्कराणि दद्यात् तत्रमं
त्रः कैलासवासी भगवान् [illegible] ततश्च तात्मकं लिंगरूपी द्विजानुवांछितमिति ततः संजातासिद्ध
यैतेभ्यो द्वादशताः [illegible] यथाशक्ति दक्षिणां दद्यात् ततो व्रतेऽस्मिन् यन्न्यूनं वा पूर्णमेव वा सर्वसंपूर्णतां यातु प्रसादा मेव
दाङ्कवतां मे इति मंत्रेण व्रतसमर्पणं ततो व्रतसांगतासिद्ध्यर्थं द्वादशब्राह्मणेभ्यो द्वादशतिलपात्रदानं यस्यस्मृत्या
तमोत्तमं च तपोयज्ञक्रियादिषु न्यूनं संपूर्णतां याति तस्येव पूर्णमनेनमः इति तिलमापनं ततश्च [illegible] ब्राह्मणान्
जयित्वा दक्षिणादानं यथाशक्तिभूयसीं दक्षिणां दत्वा मंडपादिकं सर्वसामग्रीकमाचार्याय दत्वा स्वजनैः सहभोज
नं कुर्यात् इति दीक्षितमणिरामकृते शिवरात्रिव्रतोद्यापनप्रयोगः उद्यापनसामग्री फाल्गुनामावास्यायुगादिः

मंडपस्तोभार्यवस्त्रादि	वेदोषा १ कलश १	सप्तमृत्तिका	ताम्रपात्र १२	कूष्माण्ड १ तद	सर्वौषधी	[illegible]
वेदल्लीकं अलंकारादि	[illegible] वाहूप	पंचपल्लव	ताम्रपात्र १ [illegible]	भावेनपायस	पंचामृत	विष्णुपुरा
आचार्य १ ब्रह्मा १ ऋत्विक्	पुण्याहवाचन	[illegible]	लिंगोक्तनैवेद्य	नालिकेर १८	पंचरत्न	ले माघा
कलश ११ धातुमय	[illegible]	यज्ञोपवीत [illegible]	[illegible]	[illegible]	वस्त्र [illegible]	[illegible] तेपंचद
ग्रहाङ्कौ मण्डलमेवाः	कलश १ पवितंडुल	वस्त्र [illegible]	[illegible]	[illegible]	[illegible]	[illegible]
				सोपस्करा पंचपा	[illegible]	[illegible]
					[illegible]	[illegible]
					[illegible]	[illegible]

[illegible] कालः [illegible] पितृणां [illegible] वाहूणां [illegible] माघास्तितेति [illegible] [illegible]

भाद्रते कालेधनिष्ठापदिनामतस्मिन्नवे विष्णुपालतदापितृभ्यः दत्तंतिलान्नंप्रददातितृप्तिंवर्षाकृतंतात्कालेमनुष्येति
द्वंपंमन्वादि इति फाल्गुनशुक्लनवम्यनंतसंज्ञा तदुक्तंब्रह्मपुराणे फाल्गुनामलपक्षस्यशुक्लेनवमीयामहीतले
ग्मनंताख्यामहापुण्यासर्वपापहरामता गोदानादिनेसर्वथः तथा फाल्गुनामलेपक्षस्यशुक्लेद्वादशीतुयागोविं
दद्वादशीनामसहापातकनाशिनी अस्यांगोविंदपूजोपवासादिकंकार्यं इयमेववसंतकस्यादिः फाल्गुनपौर्णि
मास्यांकृत्यविशेषः कृष्णतत्त्वार्णवे फाल्गुन्यामवमाजातोयदितोक्रमपापादिति अत्रैकाप्यनुत्पद्यांजातः होलिके
लीप्रसूतौ तातत्रविधिर्विवस्तुज्योत्प्राप्तेचंद्रोदयेसति नृत्यगीतैस्तथावाद्यैःकार्यस्तत्रप्रजागरः इति अत्रोपवासश्च धर्मा
भावाद्वैतंकार्यं अत्रदानविशेषमाह विष्णुः फाल्गुनीपुण्यचैत्रस्यां तत्रस्नातावाल्लभायसंस्कृतंतथा स्त्रीर्णिमायनंनवि
वेद्य भार्यापत्यवतींद्रवत्तवतींचाप्नोति नार्थपिभर्तृमिति यस्माद्द्रुसंकल्पनंकेवावस्यस्वावसच प्रायनंनिवे
द्य भार्यापत्यवतींद्रवत्तवतींचाप्नोति नार्थपिभर्तृमिति व्याख्यानमप्यासवस्यास्तुतस्माज्जन्मनिजन्मनि अस्यामेवं
कृपनंनित्यमन्नसंक्लिपमुक्तं होमसंपदेहिमेतिसंपद्याव्यादानेनकेकाव इतिप्राव्यादानमंत्रैः अस्यामेवपौर्णिमा
स्यांहोलिकोत्सवः सचप्रदोषव्यापिनीभद्राहीना दिनद्वयेतद्याप्तावुत्तरैव पूर्वदिनेभद्रासत्वात् प्रदोषव्यापिनीग्रा
ह्या पूर्णिमाफाल्गुनीसदा तस्यांभद्रामुखंत्यक्त्वापूज्याहोलानिशामुखे इतिनारदवचनात् त्र्याले दिनार्द्धात्पर
तोविस्तासफाल्गुनीपूर्णिमायदा रात्रौभद्रावसानेतुहोलिकादीप्यतेतदा यदानुप्रथमदिनेप्रदोषकालेचतुर्दशी
परदिनेप्रदोषात्प्रागेवपूर्णिमासमाप्यते तदापूर्वदिनेरात्रौभद्रामुखंत्यक्त्वायामेवहोलिकादाहः कर्तव्यः प्रदो
षव्यापिनीनस्यापदापूर्वदिनेतदा भद्रामुखंवर्जयित्वाहोलिकायाःप्रदीपनमितिनारदवचनात् यदानुपूर्वदि

हैलिकेरे स्वङ्गा

तेसंपूर्णा ग्रा… दिनेप्रदोष…र्णिमा ग्राह्या सोदयं च तदा ग्रहणस्पर्शस्नानं कृत्वा ग्रहणमध्य एव होलिकादीपनं कार्यं
शुक्लकालत्वाज्जेमानाभावात् नच सर्वेषामेव वर्णानां तत्तत्कं राकृदर्शने स्नात्वा कर्माणि कुर्वीत तत्र तमन्त्रं विसर्जये
त् इति विधिविधानात् अथ ग्रहणस्य तत्कैतिवाच्यं तस्यस्थानास्तुर्वेदिबोधात्सर्वात् अथ कथा संध्यादीनामप्यकरणमाप
द्येत अत्र भविष्ये तत्र राजानं प्रतिपौरवाक्यं अस्माकं हि गृहे वा पिंडुंढानामेह राक्षसी दिवा रात्रौ समागम्य
बालान्पीडयते बलात् रक्षोपायं च केनापि मेघजैर्वा नराधिप मंत्रैः परमाचारैः शान्तिं यत्नेन साधिते इति पौरव
चः श्रुत्वा राजा पृष्टो ऽथ नारदः नारद उवाच अद्य पंचदशी शुक्ला फाल्गुनस्य नराधिप अभयः प्रदानं लोकानां दी
यतां पुरुषोत्तम यथा हसंतिनि तालोकाहसंति च रमंति च दारुजानि खड्गानि गृहीत्वा समरोत्सुकाः योधा इव
विनिर्यान्तु शिशवः संप्रहर्षिताः संचयं शुष्ककाष्ठानामुपलानां च कारयेत् तत्राग्निं विधिवद्धुत्वा रक्षोघ्नैर्मंत्रवि
स्तरैः ततः किलकिलाशब्दैस्तालशब्दैर्मनोरमैः तमग्निं त्रिः परिक्रम्य गायंति च हसंति च जल्पंतः स्वेच्छया लोका
निःशंका यस्य यन्मतं तेन शब्देन सा पापा होमेन च विनाकृता अदृष्टघातैर्डिंभानां राक्षसी क्षयमेष्यति अत्रैव निशा ६६
मेपार्थ संत्रस्ताः शिशवो गृहे गोमयेनोपलिप्ते सचतुष्कं गृहांगणे आकारयेच्छिशुप्रायान् खड्गव्यग्रकरान्नृपान्
ते काष्ठखड्गैः संस्पृश्य बालान्हास्यकरैः शिशून् तेभ्यस्तिलान्भवेद्दातव्यं गुडं पक्वान्नमेव च एवं ढुंढेतिपातस्याः सदोषैः प्र
शामं व्रजेत् बालानां रक्षणं कार्यं तस्मात्तस्मिन्निशागमे इति पूजामंत्रश्च असृक्पाभयसंत्रस्तैः कृता त्वं होलि बालि
शैः अतस्त्वां पूजयिष्याम्यहं दैवि नमोस्तु ते पाठेन सप्ततादिविदुद्धिः सत्यामपि तत्सर्वं … ढुंढे देव भव
विनमोस्तुते इत्यं मन्त्रादिः इति सार्वोर्वीपृच्छकौ मलमासे सति मासद्वयेपि भवति होलिकाव्रतं शुद्धमास एव तत्रदे

भाद्रते कालेधनिष्ठायदिनामतस्मिन्भवेपि भूपालतदापितृभ्यः दत्तेतिलान्नंप्रददातितृप्तिं वर्षाणितंतात्कालेमनुष्यैरिति
इयंमन्वादिः इति फाल्गुनकृष्णनवम्यनंतसंज्ञा तदुक्तंब्रह्मपुराणे फाल्गुनामलपक्षस्यपुष्यर्क्षेनवमीयामहीतले
अनंतानामहापुण्यासर्वपापहरामता श्रीवदुजादिनेस्मर्यः तथा फाल्गुनामलपक्षस्यपुष्यर्क्षेद्वादशीतुयागोविं
दद्वादशीनाममहापातकनाशिनी अस्यांगोविंदपूजोपवासादिकंकार्यं इयमेवसामान्यतक्रसादिः फाल्गुनपौर्ण
मास्यांकृत्यविशेषः कृत्यतत्वार्णवे फाल्गुन्यामर्थमजातोऽदितौकश्यपादिति अत्रैश्वर्याप्त्यर्थंयायांजातःस्मृतिके
लोकस्मृतौ नौतत्रविधिस्तत्रज्योत्स्नाप्रान्तेचंद्रोदयेसति नरस्त्रीतेस्तत्रवाद्यैःकार्यस्तत्रप्रजागरः इति अत्रोपवासस्त्वधर्मो
भावान्नैवकार्यं अत्रदानविशेषमाह विष्णुः फाल्गुनीपुक्राचैत्स्यांतत्स्यानुनालत्नायसंस्कृतंस्त्रीलिंशयनंनि
वेद्य भार्यांरूपवतींद्रव्यवतींचाप्नोति नार्यपिभर्तारमिति यस्मात्पूज्यसंकल्पनंनकेशवस्यश्रिवस्यच शयनंनिवे
द्य भार्यांरूपवतींद्रव्यवतींचाप्नोति नार्यपिभर्तारमिति श्राप्यामामाव्यक्तःस्यात्तस्माज्जन्मनिजन्मनि अस्यांस्य
रूपयंनित्यमनन्तांप्रियमनुत्तमं शोभाप्यदेहिमेनित्यंसंपद्याप्यदानेनकेशव इतिप्राप्यदानमंत्रैः अस्यामेवपौर्णिमा
स्यांहोलिकोत्सवः इयंप्रदोषव्यापिनीग्राह्या दिनद्वयेतद्व्याप्तौतुपरैव पूर्वदिनेभद्रासत्वात् प्रदोषव्यापिनीग्रा
ह्या पूर्णिमाफाल्गुनीसदा तस्यांभद्रामुखंत्यक्त्वापूज्याहोलानिशामुखे इतिनारदवचनात् शाले दिनार्द्धपर
तोविष्टाफाल्गुनीपूर्णिमायदा रात्रौभद्रावसानेतुहोलिकादीप्यतेतदा यदातुप्रथमदिनेप्रदोषकालेचतुर्दशी
परदिनेप्रदोषात्पूर्वमेवपूर्णिमासमाप्यते तदापूर्वदिनेरात्रौभद्रामुखंत्यक्त्वायामेवहोलिकादाहःकर्तव्यः प्रदो
षव्यापिनीनस्याच्चेदापूर्वदिनेतदा भद्रामुखंवर्जयित्वाहोलिकायाःप्रदीपनमिति नारदवचनात् यदातुपूर्वदि

ते संपूर्णा मा[illegible]पर्वदिने प्रदोष[illegible]पौर्णिमा ग्रस्तोदयं च तदा ग्रहणं कृत्वा ग्रहणमध्य एव होलिकादीपनं कार्यं
शुभकालस्यागेमानाभावात् नत्र सर्वेषामेव वर्णानां स्नातकं स्मृत्यन्तरे स्नात्वा कर्माणि कुर्वीत इति तन्मन्त्रं विसर्जये
त् इति विधिः ग्रहणग्रहणं तत्र केचित्वाक्यं तस्य स्नानात् पूर्वं विधेः स्नानात् सर्पात् अथ संध्यादीनां मध्यकाले
घते अथात्र कृत्यं भविष्ये तत्र राजानं प्रति पौरवाक्यं अस्माकं हि गृहे वा पिंडुदानामेह रात्रसी दिवा रात्रौ समागम्य
बाला पीड्यते बलात् रक्षोपायं न केनापि मेषजैर्वा नराधिप मंत्रैः परमाचारैः शान्तिं तं नमस्यते इति यो
चः श्रुत्वा राजा पृष्टवान्नारदः नारद उवाच अद्य पंचदशी शुक्ला फाल्गुनस्य नराधिप अभीः प्रदानं लोकानां दि
यतां पुरुषोत्तम यथा शंकां विना लोका हसंतु रमंतु च दारुजानि होत्वा समस्त लोकाः बालकाः
विन्यस्य शैशवः संप्रहर्षिताः संचयं शुष्ककाष्ठानामुपलानां च कारयेत् तत्राग्निं विधिवद्धुत्वा रक्षोघ्नैर्मंत्रवि
स्तरैः ततः किल किलाशब्दैस्तालशब्दैर्मनोरमैः तमग्निं त्रिः परिक्रम्य गायंतु च हसंतु च जल्पंतः स्वेच्छया लोका
निःशंका यस्य यन्मतं तेन शब्देन सा पापा होमेन च निराकृता अदृष्टघातेर्डिभानां राक्षसी क्षयमेष्यति अतस्त्वां तत्र ९६
मे पार्थ संप्राप्ताः शिशवो गृहे गोमयेनोपलिप्ते च सचतुष्के गृहांगणे आकारयेच्छिशुप्रायान्खड्गहस्तान्प्रयान्
ते काष्ठ खड्गैः संस्पृश्य शब्दैः हास्यकरैः शिशून् तदंपतितेषां दातव्यं गुडपक्वान्नमेव च एवं कृते तु पातकं सदोषः प्र
यामं व्रजेत् बालानां रक्षणं कार्यं तस्मात्तस्मिन्निशागमे इति पूजामंत्रस्तु असृक्पाभयसंत्रस्तैः कृता त्वं होलि बालि
शैः अतस्त्वां पूजयिष्यामि भूते भूतिप्रदा भव पाठेन स्मृतिनाद विभु ... तत्सर्वं ... दिवि भूते दे भव
वितमेवास्तु ते इयं मन्वादि ... सा ... मलमासे ... मासद्वये ... भवति होलिकाव्रतं ... एव तत्र दो

प्र॰वि॰ लोत्सवः कार्यः तदुक्तं कृत्यचिंतामणौ तो गाले नंदो दोलागतं दृष्ट्वा गोविंदं पुरुषोत्तमं फाल्गुन्यां संयतः सोऽपि गोविं
८२ दस्य पुरं व्रजेदिति इति फाल्गुनकृत्यं इति श्रीमहाराजाधिराजमहाराजश्रीमदनपालसिंहदेवकारिते श्रीमिश्रविश्व
दत्तात्मजश्रीमिश्रगंगारामतत्वकृद्रुद्रदीक्षितमल्लिरामकृते श्रीमदनपालविलासे धर्मकोशे व्रतसारतत्वे समाप्तम्
[illegible] ।